CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 609

Title Mahābhāṣya.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 609 Subject: Grammar

Title: Mahābhāṣya.

Author: Patanjali Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 10.6" by 4.8" Extent: 7 to 28 foll.

Language: Sanskrit. Script: Devanāgari

Remarks: Begins abruptly.

कुरुशब्दान्प्रयोक्ष्य इति २

ए स्य

त्रेणापलः क्रियते। तद्यथा॥ घटेन कार्यं करिष्यन् कुंभकारकुलं गत्वाह कुरु घटं कार्यमनेन करिष्यामीति न तद्वच्छब्दान्प्रयोक्ष्यमाणो वैयाकरणकुलं गत्वाह॥ तावत्येवा
र्थमर्थमुपादाय शब्दान्प्रयुंजते॥ यदि तर्हि लोक एषु प्रमाणं॥ किं शास्त्रेण क्रियते॥ लोकतोर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः॥ लोकतोर्थप्रयुक्ते शब्दप्रयो
गे शास्त्रेण धर्मनियमः क्रियते॥ किमिदं धर्मनियम इति॥ धर्माय नियमो धर्मनियमः॥ धर्मार्थो वा नियमो धर्मनियमः॥ धर्मप्रयोजनो वा नियमो धर्मनियमः॥ य
था लौकिकवैदिकेषु॥ प्रियतद्धिता दाक्षिणात्याः॥ यथा लोके वेदे चेति प्रयोक्तव्ये॥ यथा लौकिकवैदिकेष्विति प्रयुंजते॥ अथवा॥ युक्त एव तद्धितार्थः॥ यथा लौके
षु वैदिकेषु च कृतान्तेषु॥ लौकिके तावद् अभक्ष्यो ग्राम्यकुक्कुटः॥ अभक्ष्यो ग्राम्यशूकर इत्युच्यते॥ भक्ष्यं च नाम क्षुत्प्रतीघातार्थमुपादीयते॥ शक्यं चानेन श्वमांसादिभिर
पि क्षुत्प्रतिहंतुं॥ तत्र नियमः क्रियते॥ इदं भक्ष्यमिदमभक्ष्यमिति॥ तथा खेदात्स्त्रीषु प्रवृत्तिर्भवति॥ समानश्च खेदविगमो गम्यायां चागम्यायां च तत्र नियमः क्रियते॥ तथा
बैल्वः खादिरो वा यूपः स्यादित्युच्यते॥ यूपश्च नाम पश्वनुबंधार्थमुपादीयते॥ शक्यं चानेन किंचिदेव काष्ठमुच्छ्रित्यानुच्छ्रित्य वा पशुरनुबंद्धुं॥ तत्र नियमः क्रियते॥ तथा
ग्नौ कपालान्यधिश्रित्याभिमंत्रयते॥ भृगूणामंगिरसां घर्मस्य तपसा तप्यध्वमिति॥ अंतरेणापि मंत्रमग्निर्दहनकर्मा कपालानि संतापयति॥ तत्र च नियमः
क्रियते॥ एवं क्रियमाणमभ्युदयकारि भवतीति॥ एवमिहापि समानायामर्थगतौ शब्देन चापशब्देन च धर्मनियमः क्रियते॥ शब्देनैवार्थोभिधेयो नाप
शब्देनेति॥ एवं क्रियमाणमभ्युदयकारि भवतीति॥ अस्त्यप्रयुक्तः॥ संति वै शब्दा अप्रयुक्ताः॥ अप्रयुक्ता न संति। तद्यथा॥ ऊष। तेर। चक्र। पेचेति॥

इयं गम्येयमगम्येति। वेदे खल्वपि। पयोव्रतो ब्राह्मणः। यवागूव्रतो राजन्यः। आमिक्षाव्रतो वैश्य इत्युच्यते। व्रतं चैव नामाभ्य
वहारार्थमुपादीयते। शक्यं चानेन शालिमांसादीन्यपि व्रतयितुं। तत्र नियमः क्रियते ३ ली ५

किमतो यत्संत्यप्रयुक्ताः ॥ प्रयोगाद्धि भवां छब्दानां साधुत्वमध्यवस्यति ॥ य इदानीमप्रयुक्ताः नामी साधवः स्युः ॥ इदं विप्रतिषिद्धं यदुच्यते संति वै शब्दा अप्रयु
क्ता इति ॥ यदि संति नाप्रयुक्ताः ॥ अथाप्रयुक्ता न संति ॥ संति चाप्रयुक्ताश्चेति विप्रतिषिद्धं ॥ प्रयुंजान एव खलु भवानाह ॥ संति शब्दा अप्रयुक्ता इति ॥ कश्चेदानी
मन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे साधुः स्यात् ॥ नैतद्विप्रतिषिद्धं ॥ संतीति तावद्ब्रूमः ॥ यदेतांश्छास्त्रविदः शास्त्रेणानुविदधते ॥ अप्रयुक्ता इति ब्रूमः ॥
यल्लोके ऽप्रयुक्ता इति ॥ यदप्युच्यते कश्चेदानीमन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे साधुः स्यादिति ॥ न ब्रूमोऽस्माभिरप्रयुक्ता इति ॥ किं तर्हि यल्लोकेऽप्रयु
क्ता इति ॥ ननु च भवानप्यभ्यंतरो लोके ॥ अभ्यंतरोऽहं लोके ॥ न त्वहं लोकः ॥ अस्त्यप्रयुक्त इति चेन्नार्थे शब्दप्रयोगात् ॥ अस्त्यप्रयुक्त इति चेत्तन्न किं कारणं ॥ अर्थे
शब्दप्रयोगात् ॥ अर्थे शब्दाः प्रयुज्यंते ॥ संति चैषां शब्दानामर्थाः ॥ येष्वर्थेषु प्रयुज्यंते ॥ अप्रयोगः प्रयोगान्यत्वात् ॥ अप्रयोगः खल्वप्येषां शब्दानां न्याय्यः ॥
कुतः प्रयोगान्यत्वात् ॥ यदेतेषां शब्दानामर्थेऽन्यांश्छब्दान्प्रयुंजते ॥ तद्यथा ॥ ऊषेत्यस्य शब्दस्यार्थे क्व यूयमुषिताः ॥ तेरेत्यस्यार्थे किं यूयं तीर्णाः ॥
चक्रेत्यस्यार्थे किं ॥ यूयं पक्ववंत इति ॥ अप्रयुक्ते दीर्घसत्त्रवत् ॥ यद्यप्यप्रयुक्ताः ॥ अवश्यं दीर्घसत्त्रवल्लक्षणेनानुविधेयाः ॥ तद्यथा ॥ दीर्घसत्त्राणि वा
र्षशतिकानि वार्षसहस्रिकाणि च न चाद्यत्वे कश्चिदपि व्यवहरति ॥ केवलमृषिसंप्रदायो धर्म इति कृत्वा याज्ञिकाः शास्त्रेणानुविदधते ॥ सर्वे देशांतरे ॥
सर्वे खल्वप्येते शब्दा देशांतरेषु प्रयुज्यंते ॥ न चैवोपलभ्यंते ॥ उपलब्धौ यत्नः क्रियतां ॥ महान् शब्दस्य प्रयोगविषयः ॥ सप्तद्वीपा वसुमती त्रयो लोकाश्चत्वा

क्व यूयं कृतवंतः ॥ पेचेत्यस्यार्थे ॥ ३

रो वेदाः सांगाः सरहस्याः बहुधा विभिन्ना एकशतमध्वर्युशाखाः ॥ सहस्रवर्त्मा सामवेदः ॥ एकविंशतिधा बाह्वृच्यं ॥ नवधाथर्वणो वेदः वाकोवाक्यमितिहासः पुरा
णं वैद्यकमित्येतावान् शब्दप्रयोगविषयः इत्येतावंतं शब्दस्य प्रयोगविषयमननुनिशम्य संत्यप्रयुक्ता इति वचनं केवलं साहसमात्रं ॥ एतस्मिंश्चातिमहति शब्दस्य प्रयोगविष
ये ते ते शब्दास्तत्र तत्र नियतविषया दृश्यंते ॥ तद्यथा ॥ शवतिर्गतिकर्मा कंबोजेष्वेव भाषितो भवति ॥ विकार एनमार्या भाषंते शव इति ॥ हम्मतिः सुराष्ट्रेषु रंहतिः प्राच्य
मध्यमेषु ॥ गमिमेव त्वार्याः प्रयुंजते ॥ दातिर्लवनार्थे प्राच्येषु दात्रमुदीच्येषु ॥ ये चाप्येते भवतोऽप्रयुक्ता अभिमताः शब्दा एतेषामपि प्रयोगो दृश्यते ॥ क्व वेदे ॥ यद्वो रेवती
रेवत्यं तदूष ॥ यन्मे नरः श्रुत्यं ब्रह्म चक्र ॥ यत्रा नश्चक्रा जरसं तनूनामिति ॥ किं पुनः शब्दस्य ज्ञाने धर्मः ॥ आहोस्वित्प्रयोगे ॥ कश्चात्र विशेषः ॥ ज्ञाने धर्म इति चेत्तथाऽधर्मः
ज्ञाने धर्म इति चेत्तथा अधर्मः प्राप्नोति ॥ यो हि शब्दाञ्जानात्यपशब्दानप्यसौ जानाति ॥ यथैव शब्दज्ञाने धर्मः एवमपशब्दज्ञानेऽप्यधर्मः ॥ अथवा ॥ भूयानधर्मः प्रा
प्नोति ॥ भूयांसोऽपशब्दाः अल्पीयांसः शब्दाः ॥ एकैकस्य शब्दस्य बहवोऽपभ्रंशाः ॥ तद्यथा ॥ गौरित्यस्य गावी गोणा गोपोतलिकेत्येवमादयोऽपभ्रंशाः ॥ आचारे निय
मः ॥ आचारे पुनरृषिर्नियमं वेदयते ॥ तेऽसुरा हेलयो हेलय इति कुर्वंतः पराबभूवुरिति ॥ अस्तु तर्हि प्रयोगे ॥ प्रयोगे सर्वलोकस्य ॥ यदि प्रयोगे धर्मः सर्वो लोकोऽभ्युदयेन युज्येत ॥
कश्चेदानीं भवतो मत्सरः ॥ यदि सर्वो लोकोऽभ्युदयेन युज्येत ॥ न खलु कश्चिन्मत्सरः प्रयत्नानर्थक्यं तु भवति ॥ फलवता च नाम प्रयत्नेन भवितव्यं ॥ न च प्रयत्नः फलाद्व्यतिरेच्यः ॥ न
नु च ये कृतप्रयत्नास्ते साधीयः शब्दान्प्रयोक्ष्यंते ॥ त एव साधीयोऽभ्युदयेन योक्ष्यंते ॥ व्यतिरेकोऽपि लक्ष्यते ॥ दृश्यंते हि कृतप्रयत्नाश्चाप्रवीणाः ॥ अकृतप्रयत्नाश्च प्रवीणाः ॥ त
त्र फलव्यतिरेकोऽपि स्यात् ॥ एवं तर्हि नापि ज्ञान एव धर्मो नापि प्रयोग एव ॥ किं तर्हि शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन ॥ शास्त्रपूर्वकं यः शब्दान्प्रयुंक्ते सोऽभ्युदयेन
युज्यते ॥ तत्तुल्यं वेदशब्देन ॥ वेदशब्दा अप्येवमभिवदंति ॥ योऽग्निष्टोमेन यजते य उ चैनमेवं वेद ॥ योऽग्निं नाचिकेतं चिनुते य उ चैनमेवं वेद ॥ अपर आह ॥ तत्तुल्यं वेदशब्दे
न ॥ यथा वेदशब्दा नियमपूर्वमधीताः फलवंतो भवंति ॥ एवं यः शास्त्रपूर्वकं शब्दान्प्रयुंक्ते सोऽभ्युदयेन युज्यत इति ॥ अथवा पुनरस्तु ज्ञान एव ॥ ननु चोक्तं ज्ञाने धर्म इति चे
~~त्तथाऽधर्म इति ॥ ज्ञाने धर्म इति चेत्तथा अधर्मः प्राप्नोति ॥ यो हि शब्दाञ्जानात्यपशब्दानप्यसौ जानाति ॥ यथैव शब्दज्ञाने धर्मः ॥ एवमपशब्दज्ञानेऽप्यधर्मः ॥ अथवा~~

इति। नैष दोषः। शब्दप्रमाणका वयं। यच्छब्द आह तदस्माकं प्रमाणं। शब्दश्च शब्दज्ञाने धर्ममाह। नापशब्दज्ञानेऽधर्मं। यच्च पुनरशिष्टाप्रतिषिद्धं नैव तद्दोषाय भवति ना-
भ्युदयाय। तद्यथा। हिक्कितहसितकंडूयितानि नैव दोषाय भवंति नाभ्युदयाय। अथवाभ्युपाय एवापशब्दज्ञानं शब्दज्ञाने। योऽपशब्दाञ्जानाति शब्दानप्यसौ जानाति। तदेवं ज्ञाने धर्म
इति ब्रुवतोऽर्थादापन्नं भवति। अपशब्दज्ञानपूर्वके शब्दज्ञाने धर्म इति। अथवा कूपखानकवदेतद्भविष्यति। तद्यथा। कूपखानकः कूपं खनन्यद्यपि मृदा पांसुभिश्चावकीर्णो भवति सोऽप्सु
संजातासु तत एव तं गुणमासादयति येन स च दोषो निर्हण्यते भूयसा चाभ्युदयेन योगो भवति। एवमिहापि यद्यप्यपशब्दज्ञानेऽधर्मस्तथापि यस्त्वसौ शब्दज्ञाने धर्मस्तेन स च दोषो निर्घानिष्यते भू-
यसा चाभ्युदयेन योगो भवति। यदप्युच्यते आचारे नियम इति। याज्ञे कर्मणि स नियमः। अन्यत्रानियमः। एवं हि श्रूयते। यर्वाणस्तर्वाणो नाम ऋषयो बभूवुः प्रत्यक्षधर्माणः परापरज्ञा
विदितवेदितव्या अधिगतयाथातथ्याः। ते तत्रभवंतो यद्वानस्तद्वान इति प्रयोक्तव्ये यर्वाणस्तर्वाण इति प्रयुंजते। याज्ञे पुनः कर्मणि नापभाषंते। तैः पुनरसुरैर्याज्ञे कर्मण्यपभाषितं ततस्ते परा-
भूताः। अथ व्याकरणमित्यस्य शब्दस्य कः पदार्थः। सूत्रं। सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्नः। सूत्रे व्याकरणे षष्ठ्यर्थो नोपपद्यते। व्याकरणस्य सूत्रमिति। किं हि तदन्यत्सूत्राद्व्याकरणं यस्यादः
सूत्रं स्यात्। शब्दाप्रतिपत्तिः। शब्दानां चाप्रतिपत्तिः प्राप्नोति। व्याकरणाच्छब्दान्प्रतिपद्यामह इति। न हि सूत्रत एव शब्दान्प्रतिपद्यंते। किं तर्हि। व्याख्यानतश्च। ननु च तदेव सूत्रं विगृहीतं व्याख्यानं भवति।
न केवलानि चर्चापदानि व्याख्यानं वृद्धिः आत् ऐजिति। किं तर्हि। उदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत्समुदितं व्याख्यानं भवति। एवं तर्हि शब्दः। शब्दे ल्युडर्थः। यदि शब्दो व्याकरणं ल्युडर्थो
नोपपद्यते। व्याक्रियतेऽनेनेति व्याकरणं। न हि शब्देन किंचिद्व्याक्रियते। केन तर्हि। सूत्रेण। भवे। भवे च तद्धितो नोपपद्यते। व्याकरणे भवो योगो वैयाकरण इति। न हि शब्दे भवो योगः। क्व तर्हि।
सूत्रे। प्रोक्तादयश्च तद्धिताः। प्रोक्तादयश्च तद्धिता नोपपद्यंते। पाणिनिना प्रोक्तं पाणिनीयं। आपिशलं। काशकृत्स्नमिति। न हि पाणिनिना शब्दाः प्रोक्ताः। किं तर्हि। सूत्रं। किमर्थमिदमुभ-
यमुच्यते। भवे प्रोक्तादयश्च तद्धिता इति। न प्रोक्तादयश्च तद्धिता इत्येव भवेऽपि तद्धितश्चोदितः स्यात्। पुरस्तादिदमाचार्येण दृष्टं भवे तद्धित इति तत्पठितं। ततः उत्तरकालमिदं दृष्टं प्रोक्तादयश्च
तद्धिता इति। तदपि पठितं। न चेदानीमाचार्याः सूत्राणि कृत्वा निवर्तयंति। अयं तावददोषः। यदप्युच्यते शब्दे ल्युडर्थ इति। नावश्यं करणाधिकरणयोरेव ल्युड्विधीयते। किं तर्हि। अन्येष्वपि कार-
केषु। कृत्यल्युटो बहुलमिति। तद्यथा। प्रस्कंदनं प्रपतनमिति। अथवा शब्दैरपि शब्दा व्याक्रियंते। तद्यथा। गौरित्युक्ते सर्वे संदेहा निवर्तंते। नाश्वो न गर्दभ इति। अयं तर्हि दोषः। भवे प्रोक्ताद-
यश्च तद्धिता इति। एवं तर्हि लक्ष्यलक्षणे व्याकरणं। लक्ष्यं च लक्षणं चैतत्समुदितं व्याकरणं भवति। किं पुनर्लक्ष्यं लक्षणं च। शब्दो लक्ष्यः सूत्रं लक्षणं। एवमप्ययं समुदाये व्याकरणशब्दः प्रवृत्तो-
ऽवयवे नोपपद्यते। सूत्राणि चाप्यधीयान इष्यते वैयाकरण इति। नैष दोषः। समुदाये

षु हि शब्दाः प्रवृत्ता अवयवेष्वपि वर्त्तंते। तद्यथा। पूर्वे पंचालाः उत्तरे पंचालाः। तैलं भुक्तं घृतं भुक्तं। शुक्लो नीलः कृ-
ष्ण इति। एवमयं समुदाये व्याकरणशब्दः प्रवृत्तोऽवयवेष्वपि वर्त्तते। अथवा पुनरस्तु सूत्रं। ननु चोक्तं सूत्रे व्याकरणे षष्ठ्य-
र्थोऽनुपपन्न इति। नैष दोषः। व्यपदेशिवद्भावेन भविष्यति। यदप्युच्यते शब्दाप्रतिपत्तिरिति। न हि सूत्रत एव शब्दान्प्रतिपद्यंते।
किं तर्हि। व्याख्यानतश्चेति। परिहृतमेतत्। तदेव सूत्रं विगृहीतं व्याख्यानं भवतीति। ननु चोक्तं न केवलानि चर्चापदानि व्याख्या-
नं वृद्धिः आत् ऐजिति। किं तर्हि। उदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत्समुदितं व्याख्यानं भवतीति। अविजान-
त एतदेवं भवति। सूत्रत एव हि शब्दान्प्रतिपद्यंते। आतश्च सूत्रत एव। यो ह्युत्सूत्रं कथयेन्नादो गृह्येत। अथ किमर्थो वर्णाना-
मुपदेशः। वृत्तिसमवायार्थो वर्णानामुपदेशः। वृत्तिसमवायार्थो वर्णानामुपदेशः कर्त्तव्यः। किमिदं वृत्तिसमवायार्थ
इति। वृत्तये समवायो वृत्तिसमवायः। वृत्त्यर्थो वा समवायो वृत्तिसमवायः। वृत्तिप्रयोजनो वा समवायो वृत्तिसमवा-
यः। का पुनर्वृत्तिः। शास्त्रप्रवृत्तिः। कः समवायः। वर्णानामानुपूर्व्येण सन्निवेशः। अथ क उपदेशः। उच्चारणं। कुत
एतत्। दिशिरुच्चारणक्रियः। उच्चार्य हि वर्णानाह। उपदिष्टा इमे वर्णा इति। अनुबंधकरणार्थश्च। अनुबंधकरणार्थश्च
वर्णानामुपदेशः कर्त्तव्यः। अनुबंधानासंक्ष्यामीति। न ह्यनुपदिश्य वर्णाननुबंधाः शक्या आसंक्तुं। स एष वर्णाना-
मुपदेशो वृत्तिसमवायार्थश्चानुबंधकरणार्थश्च। वृत्तिसमवायश्चानुबंधकरणं च प्रत्याहारार्थं। प्रत्याहारो वृत्त्यर्थः।
प्रत्याहारो वृत्त्यर्थः। इष्टबुद्ध्यर्थश्च। इष्टबुद्ध्यर्थश्च वर्णानामुपदेशः। इष्टान्वर्णान्भोत्स्य इति। न ह्यनुपदिश्य वर्णानिष्टा वर्णाः
शक्या विज्ञातुं। इष्टबुद्ध्यर्थश्चेति चेदुदात्तानुदात्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदेशः। इष्टबुद्ध्यर्थश्चेति चेदुदात्तानुदा-
त्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदेशः कर्त्तव्यः। एवंगुणा अपि हि वर्णा इष्यंते। आकृत्युपदेशात्सि-
द्धमेतत्। अवर्णाकृतिरुपदिष्टा सा सर्वमवर्णकुलं ग्रहीष्यति। तथेवर्णाकृतिस्तथोवर्णाकृतिः। आकृत्युपदेशा

सिद्धमिति चेत्संवृतादीनां प्रतिषेधः। आकृत्युपदेशात्सिद्धमिति चेत्संवृतादीनां प्रतिषेधो वक्तव्यः। के पुनः संवृ
तादयः। संवृतः कलो ध्मात एणीकृतोऽम्बूकृतोऽर्धको ग्रस्तो निरस्तः प्रगीत उपगीतः क्ष्विण्णो रोमश इति। अपर आ
ह। ग्रस्तं निरस्तमवलम्बितं निर्हतमम्बूकृतं ध्मातमथो विकम्पितं। संदष्टमेणीकृतमर्धकं द्रुतं विकीर्णमेताः स्वरदोष
भावना इति। अतोऽन्ये व्यंजनदोषाः। नैष दोषः। गर्गादिबिदादिपाठात्संवृतादीनां निवृत्तिर्भविष्यति। अस्त्य
न्यद्गर्गादिबिदादिपाठे प्रयोजनं। किं। समुदायानां साधुत्वं यथा स्यादिति। एवं तर्ह्यष्टादशधा भिन्नां निवृत्तकला
दिकामवर्णस्य प्रत्यापत्तिं वक्ष्यामि। सा तर्हि वक्तव्या। लिंगार्था तु प्रत्यापत्तिः। लिंगार्था सा तर्हि भवति। तन्नर्हि
वक्तव्यं। यद्यप्येतदुच्यते। अथवैतर्हि अनेकमनुबंधशतं नोच्चार्यं। इत्संज्ञा च न वक्तव्या। लोपश्च न वक्तव्यः। य
दनुबंधैः क्रियते तत्कलादिभिः करिष्यते। सिध्यत्येवमपाणिनीयं तु भवति। यथान्यासमेवास्तु। ननु चोक्तं। आ
कृत्युपदेशात्सिद्धमिति चेत्संवृतादीनां प्रतिषेध इति। परिहृतमेतत्। गर्गादिबिदादिपाठात्संवृतादीनां निवृत्तिर्भ
विष्यति। ननु चान्यद्गर्गादिबिदादिपाठे प्रयोजनमुक्तं। किं। समुदायानां साधुत्वं यथा स्यादिति। एवं तर्ह्युभय
मनेन क्रियते पाठश्चैव विशेष्यते कलादयश्च निवर्त्यंते। कथं पुनरेकेन यत्नेनोभयं लभ्यम्। लभ्यमित्याह। ७
द्विगता अपि हेतवो भवंति। तद्यथा। आम्राश्च सिक्ताः पितरश्च प्रीणिता इति। तथा वाक्यानि द्विष्ठानि भवंति
श्वेतो धावति। अलंबुसानां यातेति। अथवा इदं तावदयं प्रष्टव्यः। क्वेमे संवृतादयः श्रूयेरन्निति। आगमेषु।
आगमाः शुद्धाः पठ्यंते। विकारेषु तर्हि। विकाराः शुद्धाः पठ्यंते। प्रत्ययेषु तर्हि। प्रत्ययाः शुद्धाः पठ्यंते। धातुषु

तर्हि। धातवोऽपि शुद्धाः पठ्यंते॥ प्रातिपदिकेषु तर्हि। प्रातिपदिकान्यपि शुद्धानि पठ्यंते॥ यानि तर्ह्यग्रहणानि प्रातिप
दिकानि। एतेषामपि अवश्यं स्वरवर्णानुपूर्वीज्ञानार्थ उपदेशः कर्त्तव्यः। शशः षष इति मा भूत्। पलाशः पलाष इति मा भूत्। मं
चको मंजक इति मा भूत्॥ आगमाश्च विकाराश्च प्रत्ययाः सह धातुभिः॥ उच्चार्यंते ततस्तेषु नेमे प्राप्ताः कलादयः॥ इति॥ ॥
इति श्रीभगवत्पतंजलिविरचिते श्रीमहाभाष्ये प्रथमाध्यायस्य प्रथमे पादे प्रथममाह्निकम्॥ ॥अइउण्॥ ॥अकारस्य
विवृतोपदेश आकारग्रहणार्थः। अकारस्य विवृतोपदेशः कर्त्तव्यः। किं प्रयोजनम्॥ आकारग्रहणार्थः। अकारः सवर्णग्रह
२६ णेन आकारमपि गृह्णीयात्॥ किं कारणं न गृह्णीयात्। विवारभेदात्। किमुच्यते विवारभेदादिति। न पुनः कालभेदादपि। यथैव ह्य
यं विवारभिन्न एवं कालभिन्नोऽपि। सत्यमेतत्। वक्ष्यति तुल्यास्यप्रयत्नं सवर्णमित्यत्र आस्यग्रहणस्य प्रयोजनं। आस्ये येषां तुल्यो देशः प्रयत्नश्च ते सवर्ण
संज्ञका भवंतीति। बाह्यश्च पुनरास्यात्कालः। तेन स्यादेव कालभिन्नस्य ग्रहणं। न पुनर्विवारभिन्नस्य। किं पुनरिदं विवृतस्योपदिश्यमानस्य प्रयो
जनमन्वाख्यायते। आहोस्वित्संवृतस्योपदिश्यमानस्य विवृतोपदेशश्चोद्यते। विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायते। कथं ज्ञायते। अ इत्य यदयं
कारस्य विवृतस्य संवृततां शास्ति। नैतदस्ति ज्ञापकं। अस्ति ह्यन्यदेतस्य वचने प्रयोजनं। किं। अतिखट्वः। अतिमाल इत्यत्र [illegible] तायि ह्रस्व
स्य विवृतः प्राप्नोति। संवृतः स्यादिति। एवमर्थमिदं प्रत्यापत्तिः। नैतदस्ति। नैव लोके न च वेदे अकारो विवृतोऽस्ति। कस्तर्हि। संवृतः। योऽस्ति स भविष्यति।

तदेतत्प्रत्यापत्तिवचनं ज्ञापकमेवं भविष्यति विवृतस्योपदिश्यमानस्य प्रयोजनमच्चारव्याये इति। किं पुनरत्र विशेषः। विवृतस्यो[illegible]पदिश्य-
मानस्य प्रयोजनमच्चारव्यायते संवृतस्योपदिश्यमानस्य विवृतस्य [illegible] इति। न खलु कश्चिद्विशेषः। आहोपुरुषिकामात्रं भवानाह। संवृतस्यो-
१ पदिश्यमानस्य [illegible] विवृतस्य [illegible] इति। वयं तु ब्रूमो विवृतस्योपदिश्यमानस्य प्रयोजनमच्चारव्याय तु इति। तस्य [illegible] विवृतोपदेशादन्यत्रापि विवि-
वृतोपदेशः सवर्णग्रहणार्थः। तस्येत स्यादक्षरसमाम्नायिकस्य विवृतोपदेशादन्यत्रापि विवृतोपदेशः कर्तव्यः। कान्यत्र। धातुप्राति-
पदिकप्रत्ययनिपातस्थस्य। किं प्रयोजनं। सवर्णग्रहणार्थः। अक्षरसमाम्नायिकेनास्य ग्रहणं यथा स्यात्। किं च कारणं न स्यात्।
विकारभेदादेव। आचार्यप्रवृत्तिर्ज्ञापयति। समस्याक्षरसमाम्नायिकेन [illegible]दिस्य ग्रहणमिति। यदयमकः सवर्णे दीर्घ इति प्र-
त्याहारे [illegible] करोति। कथं कृत्वा ज्ञापकं। न हि द्वयोरक्षरसमाम्नायिकयोर्युगपत्समवस्थानमस्ति। नैतदस्ति ज्ञापकं। अस्ति
ह्यन्यदेतस्य वचने प्रयोजनं। किं। [illegible] अक्षरसमाम्नायिकेन ग्रहणमस्ति तदर्थमेतत्स्यात्। खट्वाढकं मालाढकमिति। सति प्रयोज- १०
नेन ज्ञापकं भवति। तस्माद्विवृतोपदेशः कर्तव्यः। [illegible] विवृतोपदेशो नाम। विवृतोपदिश्यमाने संवृतोपादाने विशेषः।
स एव सवर्णग्रहणार्थोऽस्तु [illegible] निशादिपदिका[illegible] ग्रहणानि तेषामेतेनाप्युपायेनोपदेशश्चोद्यते। तद्गुरु भवति। तस्मात्कार्य
[illegible]आदिस्थस्य विवृतत्वमिति। दीर्घप्लुतवचने संवृतनिवृत्त्यर्थः। दीर्घप्लुतनिवृत्त्यर्थो विवृतोपदेशः कर्तव्यः। दीर्घप्लुतौ संवृतौ मा भूतामिति।

[illegible]दाभ्यां देवदत्ता३ इति। नैव लोके न च वेदे दीर्घप्लुतौ संवृतौ स्तः। कौ तर्हि। विवृतौ। यौ स्तस्तौ भविष्यतः। स्थानी प्रकल्पयेदेतावनुस्वारो य-
यायणां। संवृतस्थानी संवृतौ दीर्घप्लुतौ प्रकल्पयेद्वा। अनुस्वारो यथा यणां। न तद्यथा। संयन्ता संवत्सरो यल्लोकं तल्लोकमिति। अनुस्वारः
स्थानी यणामनुनासिकं प्रकल्पयति। विषम उपन्यासः। युक्तं यत्सतस्तत्र प्रकॢप्तिर्भवति। सन्ति हि यणः सानुनासिका निरनुनासिकाश्च। दी-
र्घप्लुतौ नैव लोके न च वेदे संवृतौ स्तः। कौ तर्हि। विवृतौ। यौ स्तस्तौ भविष्यतः। एवमपि कुत एतत्। तुल्यस्थानौ प्रयत्नभिन्नौ भविष्यतः। न पुन-
स्तुल्यप्रयत्नौ स्थानभिन्नौ स्यातां। इकार उकारो वेति। [illegible] स्थानेऽन्तरतम इत्यत्र स्थान इति वर्तमाने पुनः स्थानग्रहणस्य प्रयोजनं यत्रा-
नेकमान्तर्यं तत्र स्थानत आन्तर्यं बलीयो यथा स्यात्। तत्रानुवृत्तिनिर्देशे सवर्णाग्रहणमनण्त्वात्। तत्रानुवृत्तिनिर्देशे सवर्णानां ग्र-
हणं न प्राप्नोति। अस्य च्वौ। यस्येति च। किं कारणं। अनण्त्वात्। न ह्येते अणः। ये नुवृत्तौ। के तर्हि। येऽक्षरसमाम्नाय उपदिश्यन्ते। एकत्वादका-
रस्य सिद्धं। एकोऽयमकारो यश्चाक्षरसमाम्नाये यश्चानुवृत्तौ यश्चात्यादिस्थः। अनुबन्धसंकरस्तु। अनुबन्धसंकरस्तु प्राप्नोति। कर्मण्यण्। आतोऽनुपसर्गे क इ-
ति। केऽपि णित्कृतं प्राप्नोति। एकाजनेकाज्ग्रहणानुपपत्तिः। एकाजनेकाज्ग्रहणानुपपत्तिर्भविष्यति। तत्र को दोषः। किरिणा
गिरिणेत्येकाज्लक्षणमन्तोदात्तत्वं प्राप्नोति। इह च घटेन तरति घटिक इति द्व्यज्लक्षणष्ठन्न प्राप्नोति। द्रव्यवच्चोपचाराः। द्रव्यव-
च्चोपचाराः प्राप्नुवन्ति। तद्यथा। द्रव्येषु नैकेन घटेनानेको युगपत्कार्यं करोति। एवमिमसकारं नानेको युगपदुच्चारयेत्। [illegible]

णातुनानालिंगकरणात्सिद्धं।विषयेणातुनानालिंगकरणात्सिद्धमेव।यदयंविषयेविषयेनानालिंगमकारंकरोतिकमीसयणख्यातेनान्य
भ्रमेकिङ्तिनेनज्ञायतेनानुबंधसंकरोस्तीति।यदिहिस्यात्नानालिंगकरणमनर्थकंस्यात्।एकमेवायंसर्वगुणमुच्चारयेत्।नैत
दस्तिज्ञापकं।इत्संज्ञाकस्यधर्मेनतस्यात्।अनुबंधेःशब्लकवेष्टकउपचेतुं।इत्संज्ञायाहिदोषःस्यात्।आचार्यप्रवृत्तिर्द्वयोरित्संज्ञा
स्यात्।कयोः।आद्यंतयोः।एवंतर्हिविषयेणापुनर्लिंगकरणात्सिद्धं।यदयंविषयेविषयेपुनर्लिंगमकारंकरोतिशाम्द्ध्व्रतोणाधि
त्यादिभ्योणितिनेनज्ञायतेनानुबंधसंकरोस्तीति।यदिहिस्यात्पुनर्लिंगकरणमनर्थकंस्यात्।अथवापुनरस्तुविषयेणातुनाना
लिंगकरणात्सिद्धमेव।ननुचोक्तंइत्संज्ञाकस्यधर्मेनतस्यादिति।नैषदोषः।लोकतएतत्सिद्धं।तद्यथालोकेकश्चिद्देवदत्तंमा
हपूरमुडीभवइकटीमवश्हपिरखीभवेति।अग्निगोमनोच्यतेनाग्निगस्तत्रोपतिष्ठते।एवमयमकारोयदग्निगोमनोच्यतेनाग्निगस्त
त्रोपस्थास्यते।यदप्युच्यतेएकाजनेकाज्ग्रहणेषुचानुपपत्तिरिति।एकाजनेकाज्ग्रहणेषुचावृत्तिसंख्यानात्।एकाजनेकाज्
ग्रहणेषुचैतत्सख्यानादनेकाच्त्वंभविष्यतीति।तद्यथा।सप्तदशसामिधेन्योभवंतीतित्रिःप्रथमामन्वाहत्रिरुत्तमामित्याहति
तःसप्तदशत्वंभवति।एवमिहाप्यावृत्तितोनेकाच्त्वंभविष्यति।भवेद्यावृत्तिकार्यंपरिहृतं।इहतुएकाच्चत्वेणमनोदाचत्वेकाचो २२
र्व्येवस्त्वदविसिद्धलोकतः।तद्यथा।लोकेकश्चित्सहस्त्रमेकांकपिलामेकैकशःसहस्त्रकृत्वोदत्वातयासर्वंतत्सहस्त्रदक्षिणंभवति

एवमपिहाय्यनेकाच्त्वंभवति।यदप्युच्यतेइष्यवच्चोपचाराःप्राप्नुवंति।भवेद्यदसंभाविकार्यंतन्नानेकोयुगपत्कुर्यात्।यत्तुखलुसं
भाविकार्यमनेकोपितद्युगपत्करिष्यति।अन्यभाव्यंतुकालशब्दव्यवायात्।अन्यभाव्यंत्वकारस्यकुतः।कालशब्दव्यवायात्।कालव्यवायाच्छब्द
व्यवायाच्च।कालव्यवायात्।दंडाग्रं।शब्दव्यवायात्।खट्वा।नचैकस्यात्मनोव्यवायेनभवितव्यं।भवतिचेद्व्यवायोन्यभावमकारस्य।युगपच्चदेशपृथक्त्वद
र्शनात्।युगपच्चदेशपृथक्त्वदर्शनान्मन्यामहे।अन्यभाव्यमकारस्येति।यदयंयुगपद्देशपृथक्त्वेषूपलभ्यते।अश्वः।अर्कः।अर्थःइतिनह्येकोदे
वदत्तोस्त्रुघ्नेचनवतिमथुरायांच।यदिपुनरिमेवर्णाःशकुनिवत्स्युः।तद्यथाशकुनयआशुगामित्वात्पुरस्तादुत्पतिताःपश्चाद्दृश्यंते।एवम
यमकारोदध्यत्रेत्यत्रदृष्टोदंडाग्रमित्यत्रदृश्यते।नैवंशक्यं।अनित्यत्वमेवंस्यात्।नित्याश्चशब्दाः।नित्येषुचशब्देषुकूटस्थैरविचालिभिर्वर्णैर्भवि
तव्यमनपायोपजनविकारिभिः।यदिचायंदध्यत्रेत्यत्रदृष्टोदंडाग्रमित्यत्रदृश्येतनायंकूटस्थःस्यात्।यदिपुनरिमेवर्णाआदित्यवत्स्युः।तद्यथा
एकआदित्योनेकाधिकरणस्थोयुगपद्देशपृथक्त्वेषूपलभ्यते।विषमउपन्यासः।नैकोद्रष्टाआदित्यमनेकाधिकरणस्थंयुगपद्देश
पृथक्त्वेषूपलभते।अकारंपुनरुपलभते।अकारमपिनोपलभते।किंकारणं।श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः।प्रयोगेणाभिज्वलि
तआकाशदेशःशब्दः।एकंचपुनराकाशं।आकाशदेशाअपिबहवः।यावताबहवस्तावतान्यभाव्यमकारस्य।आकृतिग्रहणा
त्सिद्धम्॥अवर्णाकृतिरुपदिष्टासर्वमवर्णकुलंग्रहीष्यति।तथेवर्णाकृतिस्तथोवर्णाकृतिः।नतर्हीदानींतपरकरणं।एवंचकृत्वात

तस्यानुकरणं ब्राह्मण ऌतक इत्याह। कुमार्य्‌ऌतक इत्याह। तुल्यार्थं चल्लृकारोपदेशः कर्तव्यः। के पुनः ऌत्वादयः। ऌतिकि द्विर्वचनस्वरितानाः। ऌक्‌ऌप्तशिखः। ऌक्मः प्रऌक्‌
सः। प्रऌक्मवानः। ऌत्वादिषु कार्येषु ऌकृपेर्लत्वे सिद्धं। तस्यासिद्धत्वादृकार्याणि न सिध्यंति। तस्माल्लृकारोपदेशः क्रियते॥२३॥ x

पराः क्रियंते। आकृतिग्रहणे नातिप्रसक्तमिति। न च सवर्णग्रहणेनातिप्रसक्तमिति कृत्वा तपराः क्रियेरन्। प्रत्या
ख्यायते तत्। सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणात्। सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणादनन्यत्वा
च्चेति। हल्ग्रहणेषु च। किं। आकृतिग्रहणात्सिद्धमित्येव। झलो झलि। अवात्तां। अवात्तं। अवात्त। यत्रैतन्नास्ति अण्‌
सवर्णान्न गृह्णातीति। रूपसामान्याद्वा। रूपसामान्याद्वा सिद्धमेतत्। तद्यथा। तानेव शाटकानाच्छादयामः ये मधुरा
२९ यां। तानेव शालीन्भुंज्महे ये मगधेषु। तदेवेदं भवतः कार्षापणं यन्मथुरायां गृहीतं। अन्यस्मिंश्चान्यस्मिंश्च रूपसामा
न्यात्तदेवेदमिति भवति। एवमिहापि रूपसामान्यात्सिद्धम्॥ ॥ऌलृक्॥ ॥लृकारोपदेशः किमर्थः। किं विशेषेण लृ
कारोपदेशश्चोद्यते न पुनरन्येषामपि वर्णानामुपदेशश्चोद्यते। यदि किंचिदन्येषामपि वर्णानां प्रयोजनमस्ति लृकारोपदे १२
शस्यापि तद्भवितुमर्हति। को वा विशेषः। अयमस्ति विशेषः। अस्य हि लृकारस्याल्पीयांश्चैव प्रयोगविषयः। यश्चापि प्रयो
गविषयः सोपि क्लृपिस्थस्य। क्लृपेश्च लत्वमसिद्धं तस्यासिद्धत्वादृकार एवाचः कार्याणि भविष्यंति नार्थो लृकारोपदेशेन। अत
उत्तरं पठति। लृकारोपदेशो यदृच्छाशक्तिजानुकरणप्लुत्याद्यर्थः। लृकारोपदेशः क्रियते यदृच्छाशब्दार्थोऽशक्तिजानुकरणा
र्थः प्लुत्याद्यर्थश्च। यदृच्छाशब्दार्थस्तावत्। यदृच्छया कश्चिल्लृतको नाम तस्मिन्नच्कार्याणि यथा स्युः। दध्य्लृतकाय देहि मध्व्लृत
काय देहि उदगॢतको गमत्। प्लत्यगॢतको गमत्। चतुष्टयी शब्दानां प्रवृत्तिः। जातिशब्दा गुणशब्दाः क्रियाशब्दा यदृच्छाश
ब्दाश्चतुर्थाः। अशक्तिजानुकरणार्थः। अशक्त्या कयाचिद्ब्राह्मण्या ऋतक इति प्रयोक्तव्ये लृतक इति प्रयुक्तं। नैतानि सं

ति प्रयोजनानि॥ न्याय्यभावात्कल्पनं संज्ञादिषु। न्याय्यस्य ऋतकशब्दस्य भावात्कल्पनं संज्ञादिषु साधु मन्यंते।
ऋतक एवासौ न लृतक इति। अपर आह। न्याय्य ऋतकशब्दः शास्त्रान्वितोस्ति स कल्पयितव्यः साधुः संज्ञादिषु ऋत
क एवासौ न लृतकः। अयं तर्हि यदृच्छाशब्दोऽपरिहार्यः। ऋफिडो ऌफिडुः [illegible] इति। एषोपि ऋफिड ऋफिड्डश्च। कथं। अस्ति
प्रकृतिरेषैव हि लौकिकि वक्ष्यते। फिड फिड्डौ वौणादिकौ प्रत्ययौ। त्रयी च शब्दानां प्रवृत्तिः। जातिशब्दा गुणशब्दाः क्रियाशब्दा न
संति यदृच्छाशब्दा इति॥ ॥अन्यथा कृत्वा प्रयोजनमुक्तमन्यथा कृत्वा परिहारः॥ संति यदृच्छाशब्दा इति कृत्वा प्रयो
जनमुक्तं न संतीति परिहारः। समानेचा। यदि शास्त्रान्वितोऽशास्त्रान्वितस्य निवर्तको भवति। तद्यथा। देवदत्तशब्दो देवदि
न्नशब्दं निवर्तयति नगावादीन्। नैष दोषः। पक्षांतरैरपि परिहारा भवंति। अनुकरणं शिष्टाशिष्टाप्रतिषिद्धेषु य
था लौकिकवैदिकेषु। अनुकरणं शिष्टस्य साधु भवति। अशिष्टाप्रतिषिद्धस्य वा। नैव तद्दोषाय भवति नाभ्युदयाय। यथा
लौकिकवैदिकेषु। यथा लौकिकेषु वैदिकेषु च कृतांतेषु। लोके तावत्। य एवमसौ ददाति य एवमसौ यजते य ए
वमसावधीत इति। तस्यानुकुर्वन्ददाद्यजेताधीयीत सोप्यभ्युदयेन युज्यते। वेदेपि य एवं विश्वसृजः सत्राण्य
ध्यासते इति तेषामनुकुर्वन् तद्वत्सत्राण्यध्यासीत सोप्यभ्युदयेन युज्यते। अशिष्टाप्रतिषिद्धं। ॥य एवमसौ हि
क्कति य एवमसौ हसति य एवमसौ कंडूयतीति तस्यानुकुर्वन् हिक्के [illegible] द्धसेद्वा कंडूयेद्वा नैव तद्दोषाय स्यात्

किं प्रयोजनं। ऋ्रिः पचतीत्याह। तिङ् तिङ इति निघातो यथा स्यात्। अग्नी इत्याह॥ २९

शाभ्युदयाय। यस्तु खल्वेवमसौ ब्राह्मणं हंतीति एवमसौ सुरां पिबतीति तस्यानुकुर्वन् ब्राह्मणं हन्यात् सुरां वापि
बेत् सोपि मन्ये पतितः स्यात्॥ विषम उपन्यासः। यश्चैव हंति यश्चानु हंति उभौ तौ हतः। यश्चापि बति यश्चानुपि
बति उभौ तौ पिबतः। य[illegible]स्तु खल्वेवमसौ ब्राह्मणं हंति एवमसौ सुरां पिबतीति तस्यानुकुर्वन् स्नातानुलि
प्तो माल्यगुणकंठः कदलीस्तंभविहिंद्यात् पयो वापिबेत् न स मन्ये पतितः स्यात्। एवमिहापि य एवमसाव
पशब्दं प्रयुक्त इति तस्यानुकुर्वन् अपशब्दं प्रयुंजीत सोप्यपशब्दभाक्स्यात्। अयं त्वन्योपशब्दपदार्थ
कः शब्दो यदर्थमुपदेशः कर्तव्यः। न चापशब्दपदार्थकः शब्दोऽपशब्दो भवति। अवश्यं चैतदेवं विज्ञेयं॥ ॥
यो हि मन्यते अपशब्दपदार्थकः शब्दोऽपशब्दो भवतीति अपशब्द एव तस्यापशब्दः स्यात्। न चैषोपशब्दः।
खल्वपि अयं तर्हि द्रयोनुकरणशब्दोऽपरिहार्यः। यदर्थ उपदेशः कर्तव्यः साधु कारमधीते मधुकारमधीते इति। कस्यस्य
पुनरेतदनुकरणं। कृपिस्थस्य। कृपेश्च लत्वमसिद्धं। तस्यासिद्धत्वाद्धकार एव कार्याणि भविष्यंति। भवेत्तदर्थेना न १२
र्थः स्यात्। अयं त्वन्यः कृपिस्थपदार्थकः शब्दः यदर्थ उपदेशः कर्तव्यः। न कर्तव्यः। इदमवश्यं वक्तव्यं। प्र
कृतिवदनुकरणं भवतीति ईदूदेद्द्विवचनं प्रगृह्यं भवतीति प्रगृह्यसंज्ञा यथा स्यात्। ॥यदि प्रकृतिव[illegible]द

संहं१

नुकरणं भवतीत्युच्यते॥ अपशब्द एवासौ भवति। कुमार्यृतक इत्याह। ब्राह्मण्यृतक इत्याह। अपशब्दो ह्यस्य
प्रकृतिः। न चापशब्दः। न ह्यपशब्दा उपदिश्यंते। न चानुपदिष्टा शास्त्रे प्रकृतिरस्ति। एकदेशविकृतस्या
नन्यत्वात् लृकारादयः। एकदेशविकृतमनन्यवद्भवतीति लृकारादयोपि भविष्यंति। यद्येकदेशविकृतमनन्य
वद्भवतीत्युच्यते। राज्ञः क च राजकीयं। अल्लोपोन इति लोपः प्राप्नोति। एकदेशविकृतमनन्यवत्षष्ठीनिर्दि
ष्टस्येति वक्ष्यामि। यदि षष्ठीनिर्दिष्टस्येत्युच्यते। कृपो रो ल इति लृतो न प्राप्नोति। न ह्यत्र ऋकारः षष्ठीनिर्दि
ष्टः किं तर्हि रेफः। ऋकारोप्यत्र षष्ठीनिर्दिष्टः। कथं। अविभक्तिनिर्देशः। कृप उः रः लः कृपो रो ल इति। अथ
वा पुनरस्तु विशेषेण। ननु चोक्तं राज्ञः क च राजकीयं॥ अल्लोपोन इति प्राप्नोतीति। नैष दोषः। वक्ष्यत्येत
न्मादीनां प्रसारणेन कारांतग्रहणमनकारांतप्रतिषेधार्थमिति। तत्प्रकृतमुत्तरत्रानुवर्तिष्यते। अल्लोपो
नः नकारांतस्येति। इह तर्हि कृ उः प्रत्रिः रवक्त्र। ऋन्रत इति प्रतिषेधः प्राप्नोति। रप्रतिषेधाच्च। रप्रतिषेधो ह्येवं तत्सिध्य
ति। गुरोरर एव इति वक्ष्यामि। यद्यर एव इत्युच्यते होतृ लृकारः। होतृ ऌकार इति न प्राप्नोति। गुरोरर एव क्रस्व से
ति वक्ष्यामि। स एष सूत्रभेदेन लृकारोपदेशः कृत्यार्थं सन् प्रत्याख्यायते सेषा महतो वंशस्तंबाल्लट्वानि

क्ष्यते॥ ॥एओङ्॥ ऐऔच्॥ ॥इदं विचार्यते। इमानि संध्यक्षराणि तपराणि वोपदिश्येरन्। एत् ओत् ङ्॥
एत्। ओत्च् इति। अतपराणि वा यथान्यासमिति। कश्चात्र विशेषः। संध्यक्षरेषु तपरोपदेशश्चेत्तपरोच्चारणं॥
संध्यक्षरेषु तपरोपदेशश्चेत्तपरोच्चारणं कर्तव्यं। प्लुतादिष्वज्विधिः। प्लुत्यादिष्वजाश्रितो विधिर्न सिध्यति। गो३त्रात।
२४ नो३त्रात इत्यौत्रानचि च अच उत्तरस्य यरो द्वे भवत इति द्विर्वचनेन प्राप्नोति। इह च प्रत्यङ्ङै३तिकायनः। उदङ्ङौ३
पगव इति। अचीति ङमुड् न प्राप्नोति। प्लुतसंज्ञा च। प्लुतसंज्ञा च न सिध्यतीति। ऐ३तिकायनः। औ३पगव॥
ऊकालोऽज्झ्रस्वदीर्घप्लुतसंज्ञो भवतीति प्लुतसंज्ञा न प्राप्नोति। संवृतस्तर्हि न तपराणि। अतपर एच इग्घ्रस्वादेशे। यद्य २५
तपराणि एच इग्घ्रस्वादेश इति वक्तव्यं। किं प्रयोजनं। एचो ह्रस्वादेशशासनेषु अर्ध एकार अर्ध ओकारो वा मा
भूतामिति। ननु च यस्यापि तपराणि तेनाप्येतद्वक्तव्यं। इमौ वैचौ समाहारवर्णौ मात्रावर्णस्य मात्रेवर्णोवर्ण
योः। ह्रस्वादेशशासनेषु कदाचिदवर्णः स्यात्। कदाचिदिवर्णोवर्णौ। मा कदाचिदवर्णो भूदिति। प्रत्याख्यायते एत
त्। ऐचोश्चोत्तरभूयस्त्वादिति। यदि प्रत्याख्यानपक्षः। इदमपि प्रत्याख्यायते। असिद्धमेङः सस्थानत्वा
दिति। ननु च एङः सस्थानतरौ अर्ध एकारोऽर्ध ओकारो न तौ स्तः। यदि हि तौ स्यातां तावेवायमुपदिशेत्॥

ननु च नो३त्रातानां सत्यमुच्चारणयनीयामर्धमिकारमर्धमाकारं वा धापते॥ सुजाते एअश्वसूनृते। अध्वर्यो अद्रिभिः सुतं। शुक्रं ते एअन्यद्य
जतं। ते एअश्वसूनृते इति। पारषदकृतिरेषा तत्रैव भवतां॥ नैव हि लोके नान्यस्मिन्वेदे। अर्ध एकारोऽर्ध ओकारो वास्ति॥ एकादेशे दीर्घग्रहणं॥ एकादेशे दीर्घ
ग्रहणं कर्तव्यं॥ आद्गुणः। वृद्धिरेचि। दीर्घ इति किं प्रयोजनं॥ आन्तर्यतस्त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा मा भूवन्निति।
खट्वा इन्द्रः। खट्वेन्द्रः॥ खट्वा उदकं। खट्वोदकं॥ खट्वा ईषा। खट्वेषा॥ खट्वा ऊढा। खट्वोढा॥ खट्वा एलका। खट्वैलका॥ खट्वा औदनः। खट्वौदनः॥ खट्वा
ऐतिकायनः। खट्वैतिकायनः॥ खट्वा औपगवः। खट्वौपगवः॥ इति॥ तत्तर्हि दीर्घग्रहणं कर्तव्यं। न कर्तव्यं। उपरिष्टाद्योगविभागः करिष्यते॥ अकः
सवर्णे एको भवति। ततो दीर्घः। यो ऽन्तरतमो दीर्घः स भवति॥ स एकः सर्वपरयोरिति एवं निर्दिष्ट इति॥ इहापि तर्हि प्राप्नोति। पचविदं पचंतीति॥ नैष दो
षः। इह तावत्। पचुमिति॥ अस्य कस्तीपतासिद्धं सोयमेवं सिद्धे सति पदर्वग्रहणं करोति। तस्यैतत्प्रयोजनं॥ यथाजातीयकः पूर्वः तथाजातीयक उत्त
रो यथा स्यादिति। वृद्धमिति। इर्वर्द्ध एवानुवर्तते॥ अथ पर्हेतास्ति पचंतीति। अतो गुणे पररूपमिति तासिद्धं सोयमेवं सिद्धे सति पररूपग्रहणं करोति तस्यैतत्प्र
योजनं॥ यथाजातीयकं परस्य रूपं तथाजातीयकमुभयोर्यथा स्यादिति॥ इह तर्हि खट्वर्श्यमालिर्श्य इति दीर्घविवचनाद्वकारेण॥ आनंतर्यादिकारो कारेण।
न चको दोषः। विन्दहीत स्माद्वर्णं प्रसज्येत॥ नश्च मो यत्र किं प्रमाणो गदो षस्तत्र कथं अन्त्रा प्राप्नोति॥ नैष दोषः॥ आचार्यप्रवृत्तिर्ज्ञापयति। न दीर्घ ह्रस्वाश्रयो
विधिर्भवतीति॥ यदयं दीर्घाच्छिदुकं शास्ति॥ नैतदस्ति ज्ञापकं॥ अस्तिह्यन्यदेतस्य वचने प्रयोजनं किं पदान्तादिति विभाषां वक्ष्यामीति॥ यत्तर्हि सो ऽयमविशे
षेण आचार्यप्रवृत्तिर्ज्ञापयति। नानेन संप्रसारणस्य दीर्घो भवतीति। यदयं संप्रदहलः। उत्तरस्य संप्रसारण स्य दीर्घत्वं ४

र्तव्यमिति॥ किं तर्हि विचक्रियमाणेन दोषः॥ तत्र कर्तव्यं॥ क्व चक्रियमाणेन दोषः॥ संहिताविषयो हि द्विरावैदेजदीर्घः॥ अदेंगुणो दीर्घ इति॥ तत्रहि तित्र दीर्घग्रहणं
कर्तव्यं न कर्तव्यं॥ कस्मादेवांतर्यतस्त्रिमात्रचतुर्मात्राणांस्थानिनां त्रिमात्रचतुर्मात्रा आदेशा न भवंति॥ तपरो गुण इद्धी॥ ननु तः परो यस्मात्सोयं तपरः
नेत्याह॥ तादपि परस्तपर इति॥ यदि तादपि परस्तपरः ऋदोरविती हेवस्यात्॥ यवस्तवः लवः पवः इत्यत्र न स्यात्॥ नैष तकारः॥ कस्तर्हि दकारः॥ किं दकारे प्र
योजनं॥ अथ किं तकारे॥ यद्यसंदेहार्थस्तकारः दकारोपि॥ अथ मुखसुखार्थस्तकारः दकारोपि॥ इदं विचार्यतां॥ य एते वर्णैकदेशा वर्णांतरसमानाकृ
तयः एतेषामवयवग्रहणेन ग्रहणं स्याद्वा नवेति॥ कुतः पुनरियं विचारणा॥ इह समुदायाः अप्युपदिश्यन्ते॥ अवयवा अपि॥ अभ्यंतरश्च समुदायेवयवः
तद्यथा हस्तः प्रचलन्सहावयवैः प्रचलति॥ तत्र समुदायस्थस्यावयवस्यावयवग्रहणेन ग्रहणं स्याद्वा नवेति॥ जायते विचारणा॥ कश्चात्र विशेषः॥ वर्णै
कदेशा वर्णग्रहणेन चेत्संध्यक्षरे समानाक्षरविधिप्रतिषेधः॥ वर्णैकदेशा वर्णग्रहणेन चेत्संध्यक्षरे समानाक्षराश्रयो विधिः प्राप्नोति॥ स
प्रतिषेध्यः॥ अग्ने इंद्र वायो उदकं॥ अकः सवर्णे दीर्घ इति दीर्घत्वं प्राप्नोति॥ दीर्घत्वस्य विधिप्रतिषेधः॥ दीर्घत्वं स्यादित्याश्रयो विधिः प्राप्नोति॥ स प्रतिषेध्यः॥ ११
5 ग्रामणीः॥ आस्नुपरुक् अनुपदिस्वस्य पिति कृति तुग्भवतीति॥ तुक् प्राप्नोति॥ नैष दोषः॥ आचार्यप्रवृत्तिर्ज्ञापयति न दीर्घैकदेशस्याश्रयो विधिर्भवतीति॥ यदयं दीर्घा
च्छेतुकं शास्ति॥ नैतदस्ति ज्ञापकं॥ अस्ति ह्यन्यदेतस्य वचने प्रयोजनं॥ किं पदांता दिति विभाषां वक्ष्यामीति॥ यत्तर्हि योगविभागं करोति॥ इतरथा हि दीर्घात्पदांता द्वे
त्येवद्ब्रूयात्॥ इतस्तर्हि खट्वाभिर्मालाभिः॥ अतो भिस ऐसित्यैस्त्वं प्राप्नोति॥ तपरकरणसामर्थ्यान्न भविष्यति॥ इह तर्हि यातावाता॥ अतो लोप आर्धधातुक
इत्यकारलोपः प्राप्नोति॥ ननु चात्रापि तपरकरणसामर्थ्यादेव न भविष्यति॥ अस्ति ह्यन्यत्तपरकरणे प्रयोजनं॥ किं सर्वस्य लोपो मा भूदिति॥ अथ क्रियमा

णे पित परे परस्य लोपे कृते परर्वस्य कस्मान्न भवति॥ परलोपस्यासिद्धत्वात् सिद्धत्वात्॥ एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति॥ न आकारस्य स्य॥ अकारस्य लोपो
न भवतीति॥ यदयमातोनुपसर्गे क इति ककारमनुबंधं करोति कथं कृत्वा ज्ञापकं कित्करणे एतत्प्रयोजनं कितीत्याकारलोपो यथा स्यात्॥ यदि चाकारस्य स्यादकारस्य नो
यः स्यात्॥ किकरणमनर्थकं स्यात्॥ नकारस्याकारस्य लोपे कृते द्वयोरकारयोः परकृते हि सिद्धं रूपं स्यात्॥ गोदः कंबलद इति पश्यति त्वाचार्यः॥ नाकारस्य स्याकारस्य लोपो न भवतीति॥ अतः
7 कारमनुबंधं करोति॥ नैतदस्ति ज्ञापकं॥ उत्तरार्थमेतत्स्यात्॥ तुंदशोकयोः परिमृजापनुदोरिति॥ यत्तर्हि गापोष्टगित्यन न्यार्थं ककारमनुबंधं करोति॥ एकवर्णवद्वा॥ एकवर्णवद्वा दीर्घा भवन्ति
तिन्द्रकृत्यः किंप्रयोजनं॥ वावातरेति निघ्नन्ति स्मणः ह्रस्वान्नुडिति॥ इतश्चावायोर्नि मित्ते संयोगोत्याताविनिघ्नज्ञुक्षणोपन्मान्नुडिति॥ अचापि योनो ग्रहणे ज्ञापकं॥ दीर्घाद्घ्न्लोपे सलोपादि
र्न भवतीति॥ अयं तु सर्वेषामेव परिहारः॥ नाव्यपदेशे कृत्स्नावयवे तद्विधिर्यथा द्रव्येषु॥ नाव्यपदेशे कृत्स्नावयवस्यावयवाश्रयो विधिर्भवति॥ यथा द्रव्येषु॥ यथा द्रव्येषु संततरसामिषेऽनोल
दंतीति॥ नस तरसा इन्नि मांसे कान्नमतो व्याध्याप्यते॥ विघमडपयासः॥ परिहारं चैवहि तत्कर्मचोद्यते॥ असनवस्त्रान्नो देयाच॥ यथा तर्हि सिन्नदशाद्दशमात्रीत्पश्यन्ति॥ समिधो भ्या
द्धीतेति॥ नस सदशाद्दशमात्रे कांचमभ्याधीयते॥ अत्रापि वृत्तिः वर्णं चैतत्कर्मचोद्यते॥ तुल्यं स्त्री संभवोग्नौ देयाच॥ यथा न हि तिलं न विकेतव्यं वृतं न विकेतव्यमिति व्यपदेशं च न
क्रीयते॥ अव्यपदेशकृत्स्नगावः सर्षपाश्च विक्रीयंते॥ यथा तो मन विस्ट स्त्रीशोकं कर्तव्यमिति व्यपदेशकृत्स्ने स्त्रीनियोगतः कर्तव्यं॥ अव्यपदेशेकामचारः॥ यत्र तर्हि व्यपदेशोस्ति॥ क्व च व्यपद
शोस्ति॥ संध्यक्षरेषु॥ संध्यक्षरेषु विवृततरत्वात्संध्यक्षरेषु यदवर्णाविवृततरं तदन्यस्मादवर्णाद्धि यो वर्णाविवर्णाविवृततरौ तेभ्य एवाभ्यामिवर्णोवर्णाभ्यां॥ अथ वा पुनरस्त्विदंते॥ अग्रहणं
चेत्नुड्विधिलादेशविनामेषु ऋकारग्रहणं॥ अग्रहणे चेन्नुड्विधिलादेशविनामेषु ऋकारे स्वग्रहणं कर्तव्यं॥ तस्मान्नुड्द्विहलः॥ ऋकारे चेति वक्तव्यं॥ इहापि यथा स्यात्॥ आनृधतुः आनृधु
रिति॥ यस्य पुनर्गृह्यते द्विहलदर्थं तस्य सिद्धं॥ यस्यापि न गृह्यते तस्याप्येष न दोषः॥ द्विहलग्रहणं न करिष्यते तस्मान्नुड्भवतीत्येव॥ यदि न कियते आटतुः आटुरिति अत्रापि प्राप्नोति॥ अश्नोतेश्च
तेति वक्तव्यं॥ अश्नोतेर्वा दर्शयित्वा यस्याप्यस्य लोपि च स्यात्॥ लादेशः ककारग्रहणं कर्तव्यं॥ कृपो रो लः ऋकारस्य चेति वक्तव्यं॥ इहापि यथा स्यात्॥ कॢप्तः कॢप्तवानिति॥ यस

* न सिध्यति। यत्र तु रेफात् संयुक्तः। ते नम्भवड़ित्याच्च प्राप्नोति। मा भूदेवं अग्न्यवायेरस्य सिद्धं ×३

२६

पुनर्मा भूत्तेरङ्लेवन्तस्य सिद्धं॥ यस्यापि न गृह्यते तस्याप्येष न दोषः॥ ऋकारोऽप्यत्र निर्दिश्यते॥ कथमविभक्तिको निर्देशः॥ कृपउरोलः कृपोरोलइति॥ अथवा उभयत्र॥ सकारमात्रं नि

र्दिश्यते॥ रश्रुतेर्लश्रुतिर्भवति। विनामे ऋकारग्रहणं कर्तव्यं॥ रषाभ्यां नो णः समानपदे ऋकाराच्चेति वक्तव्यं॥ इहापि यथा स्यात्। मातॄणां पितॄणामिति॥ यस्य पुनर्वर्णं ते रषाभ्यामित्येव तस्य

सिद्धं॥ न सिध्यति वर्णैकदेशाः के वर्णग्रहणेन गृह्यन्ते॥ ये व्यपवृक्ता अपि वर्णा भवन्ति। यश्चापि रेफात्परं भक्तेर्न तेन कश्चिदपि व्यवधानं दृश्यते॥ एवं तर्हि योगविभागः करिष्यते॥ रषाभ्यां नो णः स

मानपदे ततोऽट्कुप्वाङ्नुम्व्यवायेऽपि व्यवाये च रषाभ्यां नो णो भवतीति॥ ततोऽट्कुप्वाङ्नुम्भिरिति॥ इदमिदानीं किमर्थं। नियमार्थं। एतैरेवाक्षरसमाम्नायिकैर्व्यवाये नान्यैरिति॥ यस्यापि न गृह्यते तस्याप्येष न दोषः॥ अ

नार्थं च बहिरङ्गलक्षणमिति॥ भवत्यकारस्य त्वमिति॥ यद्यप्येतद्धलादिषु न नमनं शब्दपठनमेतदस्ति नापकः॥ हल्वर्णमितरत्। नार्नम्॥ नित्॥ यन्नर्हिहलोऽनि शब्दपदति यत्रापि न नमनं शब्दपदति यत्राकं दध्य

र्थमेतत्स्यात्॥ बहिरङ्गा वृद्धिः अन्तरङ्गं णत्वं असिद्धं बहिरङ्गमन्तरङ्गे॥ अथवा हकारं चेति वक्तव्यं॥ इहापि यथा स्यात्। सुरूपो हसति ब्राह्मणः हसतीति॥ अस्तु तर्हि हल्वर्वेपदेशः॥ हल्वर्वेपदेशे कित्त्वं। कसिद्धि धायो

श्रूसमहणानि च॥ यदि हल्वेपदेशः कित्त्वविधेयं॥ स्निहित्वा स्नेहित्वा॥ सिस्निहिषति। सिस्नेहिषति॥ रलो व्युपधाद्धलादेरिति कित्त्वं न प्राप्नोति॥ कसिद्धिः॥ कसम्बविधेयः॥ अकृत्ते॥ अमिश्वते॥ शानद्यु

पधादनिट्स्कन्दस्कोन प्राप्नोति॥ इड्विधिः॥ इड्विधेयः॥ रुदिहि॥ स्वपिहि॥ वलादिलक्षण इड् न प्राप्नोति॥ हल्ग्रहणानि च॥ किं। अहकारान्तात्सु॥ नवकोरपः॥ हलोऽनन्तरानिन स्यात्॥ अस्तु च॥ अ

रागं॥ तस्मात्सर्वश्चैवोपदेष्टव्यः परत्र॥ यदि च किंचिदन्यत्राप्युपदेशे प्रयोजनमस्ति तत्राप्युपदेशः कर्तव्यः स्थि॥ इदं विचार्यते॥ अयं रेफो यकारवकाराभ्यां पूर्वो वोपदिश्यते॥ हयवरट्॥ पर

रवा यथान्यास्तमिति॥ कश्चात्र विशेषः॥ रेफस्य परोपदेशेऽनुनासिकद्विर्वचनपरसवर्णप्रतिषेधः॥ रेफस्य परोपदेशेऽनुनासिकद्विर्वचनपरसवर्णानां प्रतिषेधो वक्तव्यः॥ अनुनासिकस्य

स्वर्नयति प्रातर्नयतीति। यरोऽनुनासिकेऽनुनासिको वेत्यनुनासिकः प्राप्नोति॥ द्विर्वचनस्य। भद्रह्रदो मद्रह्रदः॥ यर इति द्विर्वचनं प्राप्नोति॥ परसवर्णस्य॥ कुण्डं रथेन वनं रथेन यय्यीति परसवर्ण

प्राप्नोति॥ अथोपरिष्टाद्योगविभागः करिष्यते॥ रुतः॥ नः॥ यो भवतीति ततः छंदस्य पुरस्ताद्धात्वकान्तइत्येव॥ घ्नुनाचेत्ककुत्तो इत्येतद्रेकोक्तं॥ यस्य पुनर्गृह्यते तेषु रोवेरिति नोक्तमेव त्यान्तस्य सिद्धं

यस्यापि न गृह्यते तस्याप्येष न दोषः॥ कियन्तेऽन्यास एव तु व्यञ्जनेऽपि संयोगे द्विव्यञ्जनानुविधिः॥ तुल्यरूपे संयोगे द्विव्यञ्जनाश्रयो विधिर्न प्राप्नोति॥ क्व॥ कुक्कुटः॥ पी

प्पली॥ पीत्तमिति॥ यस्य पुनर्गृह्यते तेन तस्य द्वौ ककारौ द्वौ तकारौ द्वौ पकारौ॥ यस्यापि न गृह्यते तस्यापि द्वौ ककारौ द्वौ यकारौ द्वौ तकारौ॥ कथं मात्राकालो

गम्यते न च मात्रिकं व्यञ्जनमस्ति॥ अनुपदिष्टं सत्कथं शक्यं विज्ञातुं॥ यद्यपि तावदर्थेन च वक्तेन वक्तुं॥ अत्रैतत्स्यात्स्मरणाद्वर्णानिगृह्णातीति॥ इह तु कथं स

येनास्य वत्सरः यद्धोक्तं तद्धोक्तमिति॥ अत्रैतदस्ति कारणस्य वर्णान्निगृह्णातीति॥ अत्रापि मात्राकालो गम्यते। न मात्रिकं व्यञ्जनमस्ति॥ असतः कथं शक्यं विज्ञातुं॥ २६

स्तु तर्हि हल्वेपदेशः॥ हल्वेपदेशे कित्त्वप्रतिषेधो व्यलोपवचनं॥ यदि हल्वेपदेशः कित्त्वप्रतिषेध्यं॥ देवित्वा दिदेविषति॥ रलो व्युपधादिति कित्त्वं

प्राप्नोति॥ नैष दोषः॥ नैवं विज्ञायते रलः व्युपधादिति। किं तर्हि रलः अवव्युपधादिति। किमिदमवव्युपधादिति॥ अवर्णात्ता व्युपधादवव्युपधादिति

व्यलोपवचनं च॥ व्योर्लोपो वक्तव्यः॥ गौधेरः॥ पचेरन्॥ क्नीति लोपो न प्राप्नोति॥ नैष दोषः॥ रेफोऽप्यत्र निर्दिश्यते। लोपो व्योर्वलीति। रेफे च वलि चेति॥

अथवा पुनरस्तु परोपदेशः॥ ननु चोक्तं रेफस्य परोपदेशेऽनुनासिकद्विर्वचनपरसवर्णप्रतिषेध इति॥ अनुनासिकपरसवर्णयोस्तावत्प्रतिषेधो

न वक्तव्यः॥ रेफोष्मणां सवर्णा न सन्तीति। द्विर्वचनेऽपि हि नेमौ रहौ कार्यिणौ द्विर्वचनस्य॥ किं तर्हि निमित्तमिमौ रहौ द्विर्वचनस्य॥ तद्यथा॥ ब्राह्मणा भोज्य

न्तां माठरकौण्डिन्यौ परिवेविषातामिति॥ नेदानीं तौ भुञ्जाते॥ इदं द्वयं विचार्यते॥ इमे अयोगवाहा न क्वचिदुपदिश्यन्ते॥ श्रूयन्ते च॥ तेषां कार्यार्थ उपदेशः कर्तव्यः॥

के पुनरयोगवाहाः॥ विसर्जनीयजिह्वामूलीयोपध्मानीयानुस्वारानुनासिक्ययमाः॥ कथं पुनरयोगवाहाः॥ यदयुक्ता वहन्ति। अनुपदिष्टाश्च श्रूयन्ते।

क्व पुनरेषामुपदेशः कर्तव्यः॥ अयोगवाहानामट्सु णत्वं॥ अयोगवाहानामट्सूपदेशः कर्तव्यः॥ किं प्रयोजनं॥ णत्वं॥ उरःकेण॥ उरःपेण॥ अट्व्यवाय

इति णत्वं सिद्धं भवति॥ शर्षु जश्भावषत्वे॥ शर्षूपदेशः कर्तव्यः॥ किं प्रयोजनं॥ जश्भावषत्वे॥ अयमुब्जिरुपध्मानीयोपधः पठ्यते। तस्य जश्त्वे कृते उब्जितुमित्येवं

यथा स्यात्॥ यद्युब्जिरुपध्मानीयोपधः पठ्यते। उब्जिजिषतीत्युपध्मानीयादेरेव द्विर्वचनं प्राप्नोति॥ दकारोपधे पुनर्न दोषः संयोगादय इति प्रतिषेधः सिद्धो भवति॥

यदि दकारोपधः पठ्यते॥ मा रूपसिद्धिः॥ उब्जिता उब्जितुमिति॥ असिद्धं नङ्फोरिदमस्तिस्तोः श्चुना श्चुरिति ततो वक्ष्यामि। भङ्फोः॥ ऊष्मस्थानी संनिपाते भो भवति। त

तर्हि वक्तव्यं॥न वक्तव्यं॥निपातनादेव सिद्धं॥किं निपातनं॥उजन्युज्ञौ पाण्युपतापयोरिति॥इत्यादि तर्हि प्राप्नोति॥अमुज्नः समुज्न इति॥अकृत्स्नविषये निपातनं॥अथ
वा नैतदुज्झेरूपं गमेरेतद्घुपसर्गाड्डविधीयते॥अमुज्नतः अमुज्नः समुज्नतः समुज्नत इति॥णत्वं च प्रयोजनं॥प्रणिघ्नु॥घ्नुतु घ्नु॥शारव्य॰ घायड निषत्वं सिद्धं भवति॥
नु विसर्जनीयशार व्यवायेपीति विसर्जनीयग्रहणं न कर्त्तव्यं भवति॥नुमश्चापि ग्रहणं शक्यमकर्तुं॥कथं सर्पींषि धनूंषि॥अनुस्वारे कृते शर्व्यवाय इति सिद्धं भवति॥अथ वर्ण्यो
नुमो ग्रहणं कर्त्तव्यं॥अनुस्वारे विशेषणं नुम्ग्रहणं नुमो योनुस्वार इत्येतद्यथा स्यात्॥इह मा भूत्तुंहिति॥अथ वा॥अविशेषेण परे शक्कर्त्तव्यं॥किं प्रयोजनं॥अविशेषेण संयो
गोपधासंज्ञालोत्यद्विर्वचनस्थानिवद्भाव प्रतिषेधाः॥अविशेषेण संयोगसंज्ञा च प्रयोजनं॥कुरुजक्र हलोनंतराः संयोग इति संयोगसंज्ञा संयोगे गुर्विति गुरुसंज्ञा गुरोरिति प्लुतो
भवति॥उपधासंज्ञा च प्रयोजनं॥दुष्कृतं निष्कृतं निष्पीतं इदुदुपधस्य चाप्रत्ययस्येति षत्वं सिद्धं भविष्यति॥नेतदस्ति प्रयोजनं॥न इदुपधग्रहणेन विसर्जनीयो विशेष्यते॥
किं तर्हि शब्दाको विशेष्यते॥इदुदुपधस्य सकारस्य यो विसर्जनीय इति॥अथ वा उपधाग्रहणं न करिष्यते॥इदुद्भ्यां तु परं विसर्जनीयं विशेषयिष्यामः॥इदुद्भ्यामुत्तरस्य विसर्ज
नीयस्येति॥अलोंत्यविधिश्च प्रयोजनं॥इह तत्तरति॥अलोंत्यस्य विधयो भवंतीत्यलोंत्यस्य सत्वं सिद्धं भवति॥एतदपि नास्ति प्रयोजनं॥निर्दिश्यमानस्यादेशा भवंतीति विस
र्जनीयस्यैव भविष्यति॥द्विर्वचनं च प्रयोजनं॥उरःकः उरःकः॥अनचि च अचउत्तरस्य परो द्वे भवत इति द्विर्वचनं सिद्धं भवति॥स्थानिवद्भावप्रतिषेधश्च॥स्थानिवद्भाव प्रतिषेधः
प्रयोजनं॥यद्येव भवति उरःकेण उरःकेणेत्यट्कुप्वाङ्नुम्व्यवायेपीति णत्वं॥एवमिहापि स्थानिवद्भावात्प्राप्नोति॥व्यूढोरस्केन महोरस्केनेति॥तत्राचः परस्मिन् पूर्वविधाविति प्रतिषेधः सिद्धो भवति॥
किं पुनरिमे वर्णा अर्थवंत आहोस्विदनर्थकाः॥अर्थवंतो वर्णा धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनात्॥धातव एकवर्णा अर्थवंतो दृश्यंते॥एति अध्येति
अधीत इति॥प्रातिपदिकान्येकवर्णान्यर्थवंति॥आभ्यां रभिः ए भुः॥प्रत्यया एकवर्णा अर्थवंतः॥औपगवः कापटवः॥निपाता एकवर्णा अर्थवंतः॥अ अपेहि इ इंद्रं पश्य॥

श्री

उ अपक्राम॥धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनान्मन्यामहे अर्थवंतो वर्णा इति॥वर्णव्यत्यये चार्थांतरगमनात्॥वर्णव्यत्यये चार्थांतरगमनान्मन्यामहे अर्थ
वंतो वर्णा इति॥कूपः सूपो यूप इति॥कूप इति॥सककारेण कश्चिदर्थो गम्यते॥सूप इति॥ककारापाये सकारोपजनने चार्थांतरं गम्यते॥यूप इति॥ककारसकारापाये यकारोपजनने चार्थांत
रं गम्यते॥ते मन्यामहे यः कूपे कूपार्थः स ककारस्य॥यः सूपे सूपार्थः स सकारस्य॥यो यूपे यूपार्थः स यकारस्य॥वर्णानुपलब्धौ चानर्थगतेः॥वर्णानुपलब्धौ चानर्थगतेर्मन्यामहे अर्थवंतो व
र्णा इति॥वृक्षः ऋक्षः कांडीरः आंडीरः॥वृक्ष इति सवकारेण कश्चिदर्थो गम्यते॥ऋक्ष इति वकारापाये सोर्थो न गम्यते॥कांडीर इति सककारेण कश्चिदर्थो गम्यते॥आंडीर इति ककारापाये
सोर्थो न गम्यते॥किं तर्हि उच्यते अनर्थगतेरिति॥न साधीयो ह्यर्थस्य गतिर्भवति॥एवं तर्हि इदमुच्यते तच्चेत् स्यात्॥वर्णानुपलब्धौ चातदर्थगतेरिति॥किमिदमतदर्थगतेरिति॥तस्यार्थस्
तदर्थः॥तदर्थस्य गतिस्तदर्थगतिः॥न तदर्थगतिरतदर्थगतिः॥अतदर्थगतेरिति॥अथ वा॥सोर्थस्तदर्थस्तदर्थस्य गतिस्तदर्थगतिः॥न तदर्थगतिरतदर्थगतिस्तस्या अतदर्थगतेरिति॥स
तर्हि तथा निर्देशः कर्त्तव्यः॥न कर्त्तव्यः॥उत्तरपदलोपोत्र द्रष्टव्यः॥तद्यथा॥उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः॥खरमुखः॥एवमतदर्थगतेरनर्थगतेरिति॥संघातार्थवत्त्वाच्च॥संघातार्थवत्त्वान्म
न्यामहे अर्थवंतो वर्णा इति॥येषां संघाता अर्थवंतः अवयवा अपि तेषामर्थवंतः॥येषां पुनरवयवा अनर्थकाः समुदाया अपि तेषामनर्थकाः॥तद्यथा॥एकश्चक्षुष्मान् दर्शने समर्थस्तत्समुदा
यश्च शतमपि दर्शने समर्थं॥एकश्च तिलस्तैलदाने समर्थस्तत्समुदायश्च खारीशतमपि समर्थं॥येषां पुनरवयवा अनर्थकाः समुदाया अपि तेषामनर्थकाः॥तद्यथा॥एकोंधो दर्शने समर्थस्तत्समुदा
यश्च शतमप्यसमर्थं॥एकश्च सिकतास्तैलदाने समर्थस्तत्समुदायश्च खारीशतमप्यसमर्थं॥यदि तर्हीमे वर्णा अर्थवंतः अर्थवत्कृतानि प्राप्नुवंति॥कानि॥अर्थवदधातुरप्रत्ययः प्रातिपदिकमिति प्राति
पदिकसंज्ञा॥प्रातिपदिकादिति स्वाद्युत्पत्तिः॥सुब्बंतं पदमिति पदसंज्ञा॥तत्र कोदोषः॥पदस्येति नलोपादीनि प्राप्नुवंति॥धनं वनमिति॥संघातस्यैकार्थ्यात्सुबभावो वर्णात्॥संघातस्यैकत्वा
मर्थः॥तेन वर्णात्सुबुत्पत्तिर्न भविष्यति॥अनर्थकास्तु॥प्रतिवर्णमर्थानुपलब्धेः॥अनर्थकास्तु वर्णाः कुतः॥प्रतिवर्णमर्थानुपलब्धेः॥नहि प्रतिवर्णमर्था उपलभ्यंते॥किमिदं प्रतिवर्णमिति॥
वर्णं वर्णं प्रति प्रतिवर्णं॥वर्णव्यत्ययापायोपजनविकारेष्वर्थदर्शनात्॥वर्णव्यत्ययापायोपजनविकारेष्वर्थदर्शनान्मन्यामहे॥अनर्थका वर्णा इति॥वर्णव्यत्यये कृतेस्तर्कुः॥कसेः सिकता॥

नारायण

हिंसेः सिंहः ॥ वर्णव्यत्यये नार्थव्यत्ययः ॥ अपायो लोपः ॥ घ्नंति ॥ घ्नंतु ॥ अघ्नन् ॥ वर्णापाये नार्थापायः ॥ उपजन आगमः ॥ लविता ॥ लवितुं ॥ वर्णोपजनेनार्थोपजनः ॥ विकार आदे
शः ॥ घातयति ॥ घातकः ॥ वर्णविकारे नार्थविकारः ॥ यथैव वर्णव्यत्ययापायोपजनविकारा भवंति ॥ न हृदर्थव्यत्ययापायोपजनविकारैर्भवितव्यं ॥ न चेह तद्वदर्थो मन्यामहे ॥ अनर्थ
का वर्णा इति ॥ उभयमिदं वर्णेषूक्तं ॥ अर्थवंतो नार्थका इति च ॥ किमत्र न्याय्यं ॥ उभयमित्याह ॥ कुतः स्वभावतः ॥ तद्यथा ॥ समानमीहमानानां चाधीयानानां च केचिदर्थैर्युज्यंते ॥ अप
रे न ॥ न चेदानीं कश्चिदर्थवानिति कृत्वा सर्वैरर्थवद्भिः शक्यं भवितुं ॥ कश्चिद्वानर्थक इति सर्वैरनर्थकैः ॥ तत्र किमस्माभिः शक्यं कर्तुं ॥ यत्प्रातिपदिकं धातुप्रत्ययनिपातानामेकवर्णा अर्थव
तः ॥ अतोऽन्येऽनर्थकाः ॥ स्वाभाविकमेतत् ॥ कथं ॥ यदेष भवता वर्णानामर्थवत्तायां हेतुरुपदिष्टः ॥ अर्थवंतो वर्णा धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनात् ॥ वर्णव्य
त्यये चार्थांतरगमनात् ॥ वर्णानुपलब्धौ चानर्थगतेः ॥ संघातार्थवत्वाच्चेति ॥ संघातांतराण्येवैतान्येवंजातीयकानि ॥ अर्थांतरेषु वर्तंते कूपः सूपो यूप इति ॥ यदि हि वर्णव्यत्ययकृतमर्थांतरगम
नं स्यात् ॥ भूयिष्ठ कूपार्थः सूपे स्यात् ॥ सूपार्थश्च कूपे ॥ कूपार्थश्च यूपे ॥ यूपार्थश्च कूपे ॥ सूपार्थश्च यूपे ॥ यूपार्थश्च सूपे ॥ यतस्तु खलु न किंचित् कूपस्य वा सूपे सूपस्य वा कूपे कूपस्य वा यू
पे यूपस्य वा कूपे सूपस्य वा यूपे यूपस्य वा सूपे ॥ अतो मन्यामहे ॥ संघातांतराण्येवैतान्येवंजातीयकान्यर्थांतरेषु वर्तंत इति ॥ इदं खल्वपि भवता वर्णानामर्थवत्त्वं ब्रुवता साध्योऽयानर्थकत्वं घा
तितं ॥ यो हि मन्यते यः कूपे कूपार्थः स ककारस्य ॥ यः सूपे सूपार्थः स सकारस्य ॥ यो यूपे यूपार्थः स यकारस्येति ॥ ऊपशब्दस्तस्यानर्थकः स्यात् ॥ तच्चेदमपरिहृतं ॥ संघातार्थवत्त्वाच्चेति ॥ एतस्मा
पिज्ञाप्तिपदिकसंहारायामपरिहारं वक्ष्यति ॥ अइउण् ॥ ऋऌक् ॥ एओङ् ॥ ऐऔच् ॥ प्रत्याहारे नुबंधानां कथमज्ग्रहणेषु न ॥ एतेऽप्यनुबंधाः प्रत्याहारे यानुबंध्यंते ॥ एतेषामज्ग्रहणेषु ग्रहणं प्राप्नोति
ग्रहणं कस्मान्न भवतीति ॥ किं च स्यात् ॥ दधिणकारीयति मधुणकारीयतीति इको यणचीति यणादेशः प्रसज्येत ॥ आचारात् ॥ किमिदमाचारादिति ॥ आचार्याचारात् ॥ १५
नैते वाचाचार्याणि कार्याणि कृतवंतः ॥ अप्रधानत्वात् ॥ न खल्वप्येतेषां प्राधान्येनोपदेशः क्रियते ॥ कं तर्हि ॥ वर्णस्तु ॥ कुत एतत् ॥ आचार्यस्य शैली लक्ष्यते ॥ यत्तुल्यजातीयान्
तुल्यजातीयेषूपदिशति ॥ अचः अच्सु ॥ हलो हल्सु ॥ लोपश्च बलवत्तरः ॥ लोपः खल्वपि तावद्भवति ॥ ऋकाल एजिति वा योगस्तत्कालानां यथा भवेत् ॥ अचां ग्रहणमच्कार्यं तेनो

नदिष्यति ॥ अथ वा ॥ योगविभागः करिष्यते ॥ ऊकालोऽच् ॥ उ ऊ ऊ३ इत्येवं कालोऽज्भवति ॥ ततो ह्रस्वदीर्घप्लुतसंज्ञश्च भवति ॥ ऊकालोऽच् ॥ एवमपि कुक्कुट इत्यत्रापि प्राप्नोति ॥ तत्स्था
नेऽवस्थितारः ॥ एवं परवार्य ॥ अपर आह ॥ कस्मादिदं वचनं नारभ्यते ॥ अवेत्सु योगोऽस्तु ॥ अर्थज्ञापयति यथा स्युः तत्काले प्रत्युक्तकार्याणि ॥ अथ किमर्थमेतेषां स्थानामेष स्वपदेशः क्रियते ॥ इह
संयंता सदं सरय्वश्चोकं तल्लोकमिति परसवर्णस्यासिद्धत्वादनुस्वारस्यैव द्विर्वचनं ॥ तत्र परसवर्णकृते तस्य यणपग्रहणेनाग्रहणात् सर्वस्यापि परसवर्णेऽपि स्यात् ॥ नैतदस्ति प्रयोजनं
वस्योपयत्नेन द्विर्वचनेन परसवर्णस्य सिद्धं वक्तव्यमिति ॥ यावता सिद्धत्वमुच्यते परसवर्ण एव तावत्पूर्वं भवति ॥ परसवर्णे कृते तस्य परग्रहणेन ग्रहणाद् द्विर्वचनं यथा स्यात् ॥ मा भूत् द्विर्वच
नं ॥ न तु च भेदो न भवति ॥ सति द्विर्वचने त्रियकारं असति द्विर्वचने द्वियकारं ॥ नास्ति भेदः सत्यपि द्विर्वचने द्वियकारमेव ॥ कथं हलो यमां यमि लोप इत्येवमेकस्य लोपेन भवितव्यं ॥ एवमपि भेदः ॥ सति
द्विर्वचने कदाचिद् द्वियकारं कदाचित्त्रियकारं ॥ असति द्वियकारमेव ॥ स एष कथं भेदो न स्यात् ॥ यदि नित्यो लोपः स्यात् ॥ विभाषा च स लोपः ॥ यथा भेदस्तथास्तु ॥ अनुवर्तते विभाषा ॥ शरो वि
यहार्थं पुनर्विभाषा ॥ यदयं द्विर्वचनप्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यः ॥ अनुवर्तते विभाषेति ॥ कथं कृत्वा ज्ञापकं ॥ नित्ये हि तस्य लोपे प्रतिषेधार्थेन कश्चिदर्थः स्यात् ॥ यदि नित्यो लोपः स्यात् ॥ प्रतिषेधव
चनमनर्थकं स्यात् ॥ अस्तु द्विर्वचनं ॥ झरो झरि सवर्णे इति लोपो भविष्यति ॥ पश्यति त्वाचार्यः विभाषा स लोप इति ॥ ततो द्विर्वचनप्रतिषेधं शास्ति ॥ नैतदस्ति ज्ञापकं ॥ नित्येऽपि तस्य लोपे प्रयोजनमस्ति ॥
धीवर्यं वकृष्मः ॥ यदेतत् तरयोरन्यामिति द्विर्वचनं ॥ लोपो वा द्विः समुच्चीयते ॥ कथं परस्तुल्ये ॥ एतावत्त्वं परे यण् तथा वा यमो वा ॥ यदि वा च लोपः स्याद् द्विर्वचनमनर्थकं स्यात् ॥ किं तर्हि
तयोर्योगयोर्दत्तदरणे ॥ परकृते द्विर्वचने त्रिसमानतः संयोगः ॥ इन्द्रं ॥ चन्द्रं ॥ आदित्यः ॥ इह तानीकर्तृनीति द्विर्वचनसामर्थ्याल्लोपो न भवति ॥ एवमिह दित्यो लोपो न स्यात् ॥ कर्त्ति ॥ वर्त्तेति ॥
तस्मान्नित्येऽपि लोपे प्रतिषेधार्थवद्वक्तव्यः ॥ तदेतत्र त्वेन संदिग्धमाचार्याणां वृत्तिर्विभाषानुवर्तत इति ॥ ॥ ऌण् ॥ ॥ अथ यणः कारो द्विरनुबध्यते ॥ पूर्वश्च परश्च ॥ तत्राणग्रहणेषु इणग्रहणेषु च
संदेहो भवति ॥ पूर्वेणाणपरेण वेति ॥ कतरस्मिन्नाणग्रहणे संदेहः ॥ ढ्रलोपे पूर्वस्य दीर्घोऽण इति ॥ असंदिग्धं पूर्वेणाणपरेण ॥ कुत एतत् ॥ परणाभावात् ॥ न हि ढ्रलोपे परेऽणः संति ॥ ननु चायम
स्ति ॥ आढ्ढ्रं आढ्ढ्रमिति ॥ एवं तर्हि सामर्थ्यात् पूर्वेणाणपरेण ॥ यदि हि परेण स्यात् ॥ अणग्रहणमनर्थकं स्यात् ॥ ढ्रलोपे पूर्वस्य दीर्घ इति ब्रूयात् ॥ अथ यावेनापि म ब्रूयात् ॥ अचोऽस्य न ढ

रावेवीति

भवति॥ ह्रस्वो दीर्घः प्लुत इति॥ अस्मिंस्तर्हि णग्रहणे संदेहः॥ केऽण इति॥ असंदिग्धं पूर्वेण न परेण॥ कुतः एतत्॥ पराभावात्॥ नहि के परेणाणः संति॥ ननु च अयमस्ति गोकाभोके इति॥ एवं तर्हि स
मर्थ्यात्पूर्वेण न परेण॥ यदि हि परेण स्यात्॥ अणग्रहणमनर्थकं स्यात्॥ केऽच इत्येव ब्रूयात्॥ अथ वै तदपि न ब्रूयात्॥ अचो ह्रस्व इत्येव॥ ह्रस्वो दीर्घः प्लुत इति॥ अस्मिंस्तर्ह्यणग्रहणे संदेहः॥
अणोऽप्रगृह्यस्यानुनासिक इति॥ असंदिग्धं पूर्वेण न परेण॥ कुतः एतत्॥ पराभावात्॥ नहि पदांताः परेणाणः संति॥ ननु च अयमस्ति कर्तृ हर्तृ इति॥ एवं तर्हि सामर्थ्यात्पूर्वेण॥ न परेण॥ यदि हि
परेण स्यात्॥ अणग्रहणमनर्थकं स्यात्॥ अचोऽप्रगृह्यस्यानुनासिक इत्येव ब्रूयात्॥ अथ वै तदपि न ब्रूयात्॥ अच एव हि प्रगृह्या भवंति॥ अस्मिंस्तर्ह्यणग्रहणे संदेहः॥ उरण् रपर इति॥ असंदि
ग्धं पूर्वेण न परेण॥ कुतः एतत्॥ पराभावात्॥ न ह्युः स्थाने परेणाणः संति॥ ननु चायमस्ति। कर्त्र्यर्थं हर्त्र्यर्थमिति॥ यद्यवरपरत्वं स्यात्॥ द्वयोरकारयोः अवर्णप्रसज्येत॥ इत्योपधायामिलोप इत्येवम
कस्यावलोपो न भवति॥ विभाषा सेनोपः॥ विभाषास्य वर्णे प्रसज्येत॥ अयं तर्हि मिलो लोपः तारीति॥ पदांतस्य स्थैव सः॥ न शक्यः सप्तदांतस्य विज्ञातुं॥ इह हि लोपो न स्यात्॥ जग्धीढि ढि॥ अस
र्वाः॥ पासर्द्वः॥ अपास्यादिति॥ इह तर्हि मातृणां पितॄणामिति रपरत्वं प्रसज्येत॥ आचार्यप्रवृत्तिर्ज्ञापयति॥ नाचरपरत्वं भवति॥ यदयम्नृत इद्धातोरिति धातुग्रहणं करोति॥ कथं कृत्वा ज्ञाप
कं॥ धातुग्रहणस्यैतत्प्रयोजनं॥ इह माभून्मातॄणां पितॄणामिति॥ यदि चात्र रपरत्वं स्याद्धातुग्रहणमनर्थकं स्यात् रपरत्वे कृते अनंत्यत्वादित्वं न भविष्यति॥ नैतदस्ति ज्ञापकं॥ नाचरपरत्वं भवती
ति॥ ततो धातुग्रहणं करोति॥ इहापि तर्हि इत्वं न प्राप्नोति॥ चिकीर्षति॥ जिहीर्षति॥ माभूदेवमुपधायाश्चेत्येवं भविष्यति॥ इहापि तर्हि प्राप्नोति मातॄणां पितॄणामिति॥ तस्मात्तत्र धातुग्रहणं कर्त
व्यं॥ एवं तर्हि सामर्थ्यात्पूर्वेण न परेण॥ यदि परेण स्यात्॥ अणग्रहणमनर्थकं स्यात्॥ उरज्रपर इत्येव ब्रूयात्॥ अस्मिंस्तर्ह्यणग्रहणे संदेहः॥ अणुदित्सवर्णस्य चाप्रत्यय इति॥ असंदिग्धं परेण न पू रमनवेदि:
र्वेण॥ कुतः एतत्॥ सवर्णेऽणा तपरं तदनुवर्तते॥ यदयमणुदित्सवर्णस्य चेति तकारं तपरं करोति॥ तज्ज्ञापयत्याचार्यः परेणाणः सवर्णान् गृह्णातीति॥ इत्याग्रहणे तु तर्हि संदेहः॥ असंदिग्धं परेणानस्सवर्णानिति॥ कुतः एतत्॥ आदिरंत्ये
न॥ कुतः एतत्॥ सवर्णेऽणा तपरं तदनुवर्तते॥ तदेव उरण्रपरो भवति॥ यदयमणुदित्सवर्णस्य चेति गृह्णाति इत्याद्यनुविध इति॥ तद्गुरु भवति॥ कथं कृत्वा ज्ञापकं॥ तत्र विभक्तिनिर्देशसंदिग्धग्रहणं सावर्ण्यतत्प्रामाण्यं॥ इयाकारग्रहणं पुनरस्मिन्साधा नामा ज्ञानयो प
परेणाणस्यात्॥ पदे इति॥ पूर्वेण संख्याग्रहणे न करोतीत्यादीति॥ तद्गुरु भवति॥ कथं कृत्वा ज्ञापकं॥ ३
मेवं न चीयसास्यापेन सिद्धे सति यज्ञीयांसं प्रयत्नमारभते॥ तज्ज्ञापयत्याचार्यः॥ भवत्येषा परिभाषा॥ व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणमिति॥ अणुदित्सवर्णस्य चाप्रत्यय इत्यत्र परेणाण
२८

हलं॥ इह परेणाणग्रहणमिति व्याख्यास्यामः॥ अमङणनम्॥ ॥ हल्॥ ॥किमर्थमिमौ मुखनासिकावचनो वर्णावनुबध्येते॥ नंत्कारस्थानुबध्येत कथं पानिमकार एव ग्रह
णानि हलो यमो यमि लोप इति॥ संतु यकारेण हलो यमां यमि लोप इति॥ नैवं शक्यं॥ हकारमकारयोरपि हि हकारमकारयोर्लोपः प्रसज्येत॥ न हकारमकारे हकारमकारयोः स्तः॥ कथं पुनः स्तः
स्यादिति॥ एतस्य तु मकारेण॥ पुमः खय्यम्परे भवति॥ नैवं शक्यं॥ हकारमकारपरे हि स्वविधिः प्रसज्येत॥ न हकारमकारपरः खय् अस्ति॥ कथं ङमो ह्रस्वादचि ङमुण्नित्यमिति॥ एतदप्यस्तु मका
रेण॥ ङमो ह्रस्वादचि ङमुण्नित्यमिति॥ नैवं शक्यं॥ हकारमकारपरादपि हि पदांतात्परो ङकारमकारावागमौ स्यातां॥ न हकारमकारौ पदांतौ स्तः॥ एवमपि पंचागमास्त्रयः आगमिनः॥ वैषम्यात्सं
ख्यातानुदेशो न प्राप्नोति॥ संतु तावद्यथा मा गमा नामागमिनः संख्या॥ हकारमकारौ पदांतौ न स्त इति कृत्वा आगमावपि न भविष्यतः॥ अथ किमिदमक्षरमिति॥ अक्षरं न क्षरं विद्यात्॥ नैतीष
ते न क्षरतीति वाक्षरं॥ अश्नोतेर्वा सरोक्षरं॥ अश्नोतेर्वा पुनरयमौणादिकः सरः प्रत्ययः॥ अक्षु तद् सक्षरं॥ वर्णं वाहुः पूर्वसूत्रे॥ अथ वा॥ पूर्वसूत्रे वर्णस्याक्षरमिति संज्ञा क्रियते॥ किमर्थमु
पदिश्यते॥ अथ किमर्थमुपदेशः क्रियते॥ वर्णज्ञानं वाग्विषयो यत्र च ब्रह्म वर्तते॥ तदर्थमिष्टबुद्ध्यर्थं लघ्वर्थं चोपदिश्यते॥ सोऽयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः फलितश्चंद्र
तारकवत्प्रतिमंडितो वेदितव्यो ब्रह्मराशिः॥ सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति॥ मातापितरौ चास्य स्वर्गे लोके महीयेते इति॥ ॥इति श्रीभगवत्पतंजलिविरचिते श्रीव्याकरणमहाभा
ष्ये प्रथमस्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकं समाप्तं॥ ॥श्रीकृष्णाय नमः॥ ॥वृद्धिरादैच्॥ अदेङ्गुणः॥ ॥कुत्वं कस्मान्न भवति॥ चोः कुः पदस्येति प्राप्नोति॥ भत्वान्न भवति॥ कथं भसं
ज्ञा॥ अयस्मयादीनि छंदसीति॥ छंदस्येव तेन स्यात्॥ छंदोवत्सूत्राणि भवंति॥ यदि भसंज्ञा॥ वृद्धिरादैजदेङ्गुण इति जश्त्वमपि न प्राप्नोति॥ उभयसंज्ञान्यपि छंदांसि दृश्यंते॥ तद्यथा॥ स सुष्टुभा
स ऋक्वता गणेन॥ पदत्वात्कुत्वं भत्वाज्जश्त्वं न भवति॥ एवमिहापि पदत्वाज्जश्त्वं भत्वात्कुत्वं न भविष्यति॥ किं पुनरिदं तद्भावितग्रहणं॥ वृद्धिरित्येवं ये आकारैकारौकारा भाव्यंते तेषां ग्रहणं
आहोस्विदादैच्मात्रस्य॥ किंचातः॥ यदि तद्भावितग्रहणं॥ शालीयः मालीयः॥ वृद्धिलक्षणा छन्न प्राप्नोति॥ आम्रमयं शालमयमिति वृद्धलक्षणो मयड् न प्राप्नो
ति॥ आम्रगुप्तायनिः शालगुप्तायनिरिति वृद्धिलक्षणः फिञ् न प्राप्नोति॥ अथादैच्मात्रस्य ग्रहणं सर्वभासः सर्वभास इत्यत्र तपरदर्शनासर्वं च लोकं स्वरं स्या

२

प्नोति॥इहच तावती भाव्यश्वस्य तावज्ञार्यः याबज्ञार्यः इति वृद्धिनिमित्तस्येति पुंवद्भावनिषेधः प्राप्नोति॥अस्तु तर्हि दीर्घान्तस्य न हलं॥ननु चोक्तं सर्वो भासः सर्व भासस्त्वुत्तरपदद्वैशस
र्वदेत्येषः विधिः प्राप्नोति॥नैष दोषः॥नैवं विज्ञायते उत्तरपदस्य वृद्धिरुत्तरपदवृद्धिः॥उत्तरपदवृद्धाविति किं तर्हि उत्तरपदस्येत्येवं प्रकृत्य पा वृद्धिस्तत्रान्त इत्युत्तरपदमेवमेन वृद्धिर्विहितावते अत्र
वश्यं चैतदेवं विज्ञेयं॥तज्ञावितान्तः हलो सत्पीह प्रसज्येत॥सर्वक्षार कः सर्वकार इति॥यदप्युच्यते इह तावतीभार्यस्य तावज्ञार्यः यावज्ञार्यः इत्यत्र पुंवद्भावनिषेधः प्राप्नोतीति नैष दोषः।
नैवं विज्ञायते वृद्धेर्निमित्तं॥योसौ ककारो हत्स्थायाका सेण काये वा॥अथवा यः वृद्धेर्निमित्तं वृद्धिनिमित्तं॥किंच॥कृत्स्ना या वृद्धेर्निमित्तं। यद्यारणमकारैकारौकाराणां। संज्ञाधिकारः संज्ञासं
प्रत्ययार्थः॥अथ संज्ञेति प्रकृत्य वृद्ध्यादयः शब्दाः पठितव्याः किं प्रयोजनं॥वृद्ध्यादीनां शब्दानां संज्ञेत्येष संप्रत्ययो स्यात्॥इतरथा ह्यसंप्रत्ययो यथा लोके॥अक्रियमाणे हि संज्ञाधिकारे वृद्ध्याद
ीनां संज्ञेत्येष संप्रत्ययो न स्यात्॥इदमिदानीं बहुसूत्रमनर्थकं स्यात्॥अनर्थकमित्याह॥कथं यथा लोके॥लोके ह्यर्थवन्ति चानर्थकानि च वाक्यानि दृश्यन्ते॥अर्थवन्ति तावद्गामभ्याज शुक्लां देवदत्त गा
मभ्याज कृष्णामिति॥अनर्थकानि दशदाडिमानि षडपूपाः कुण्डमजाजिनं पललपिण्डः अधरोरुकमेतत्कुमार्याः स्फैयकृतस्य पिता प्रतिशीन इति संज्ञासंज्ञासंदेहश्च॥क्रियमाणेपि संज्ञाधिका
रे संज्ञासंज्ञिनोरसंदेहो वक्तव्यः॥कुतो ह्येतत॥वृद्धिशब्दः संज्ञा आदैचः संज्ञिन इति॥न पुनरादैचः संज्ञा वृद्धिशब्दः संज्ञीति॥यत्राव कृत्याति संज्ञाधिकारः कर्त्रव्यस्संज्ञासंप्रत्यायार्थ इति नकर्त
व्यस्स्मि॥आचार्याचारात्संज्ञासिद्धिरिति॥आचार्याचारात्संज्ञासिद्धिर्भविष्यति॥किमिदमाचार्याचारादिति॥आचार्याणामुपचारात॥यथा लोके वेदे च॥लोके तावत्मातापितरौ पुत्रस्य जातस्य संवृते वकाशे नाम कुर्वाते देवदत्तो यज्ञदत्त इति॥तयोरुपचारादन्येपि जानन्ति॥इयमस्य संज्ञेति॥वेदे याज्ञिकाः संज्ञां कुर्वन्ति स्फ्यो यूप इति॥
तत्र भवतामुपचारादन्ये पि जानन्ति इयमस्य संज्ञेति॥एवमिहापि॥इहैव तावत्केचिद्व्याचक्षाणा आहुः॥वृद्धिशब्दः संज्ञा आदैचः संज्ञिन इति॥अपरे पुनः सिचि वृद्धिरित्युक्त्वा आकारैकारौकारा
नुदाहरन्ति॥यथा प्रत्यायते सा संज्ञा येन तादृशे ते संज्ञिन इति॥यदप्युच्यते क्रियमाणेपि संज्ञाधिकारे संज्ञासंज्ञिनोरसंदेहो वक्तव्य इति॥संज्ञासंज्ञ्यसंदेहश्च॥संज्ञासंज्ञिनोरसंदेहः सिद्धः कु
तः॥आचार्याचारात॥उक्तं आचार्याचारात॥आकृतिः॥अथवा॥आकृतिः संज्ञा आकृतिमन्तः संज्ञिन इति॥लोकेपि ह्याकृतिमतो मांसपिण्डस्य देवदत्त इति संज्ञा क्रियते॥लिङ्गाद्वा॥अथवा

लिङ्गमास्मभवत्स्वेति॥इत्यं लिङ्गा संज्ञेति॥वृद्धिशब्दे च तल्लिङ्गं करिष्यते॥नावैतदपि॥इदं तावदयुक्तं॥यदुच्यते आचार्याचारादिति किमत्र युक्तं॥तमेवोपालभ्यागमकं तेसूत्रमिति
सत्युनःप्रमाणीकरणमित्येतावदयुक्तं॥अपरितुष्यन्नपि भवानेनं परिहारेण नाकृतिर्लिङ्गिनवेत्याह॥तत्रापि वक्तव्यं यद्ययेतदुच्यते॥अथवा वैतर्हि संज्ञान वक्तव्या लोपश्चन
कृत्यः॥संज्ञालिङ्गमनुबन्धेषु करिष्यते॥न च संज्ञायाः निवर्तिरिष्यते॥स्वभावतः संज्ञासंज्ञिनं प्रत्याय्य निवर्तन्ते॥तेनानुबन्धानामपि निवृत्तिर्भविष्यति॥सिद्धस्त्वेवं॥ब्रह्मणोनेन भवति।
यथान्यासमेवास्तु॥ननु चोक्तं॥संज्ञाधिकारः संज्ञासंप्रत्ययार्थः॥इतरथा ह्यसंप्रत्ययो यथा लोके इति यथा लोके तथा व्याकरणे॥प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाव
काशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्रं प्रणयति स्म॥तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुं किं पुनरियता सूत्रेण॥किमतो यदशक्यं॥अतः संज्ञासंज्ञिनावेव॥कुतोनु खल्वेत
संज्ञासंज्ञिनावेवेति॥न पुनः साधुत्वानुशासनेस्मिन्साधुत्वमनेन क्रियते॥कृतमनयोः साधुत्वं॥कथं॥वृद्धिशब्दस्याविशेषेणोपदिष्टः प्रकृतिपाठे॥तस्मात्त्विर्वानूचुप॥आ
दैचोप्यक्षरसमाम्नाय उपदिष्टाः॥प्रयोगनियमार्थं तर्हीदं स्यात्॥वृद्धिशब्दात्परे आदैचः प्रयोक्तव्या इति प्रयोगनियम आरभ्यते॥किं तर्हि संस्कृत्य संस्कृत्य परस्परस्यु
अंशे॥तेषां यथेष्टमभिसंबंधो भवति॥तद्यथा॥आहर पात्रं पात्रमाहरेति॥आदेशास्तर्हीमे स्युः॥वृद्धिशब्दस्यादैचः॥षष्ठी निर्दिष्टस्य स्थाने आदेशा उच्यन्ते॥न चात्र षष्ठीप
श्यामः॥आगमास्तर्हीमे स्युः॥आगमाश्च विषष्ठीनिर्दिष्टस्यैवोच्यन्ते॥लिङ्गेन च॥न चात्र षष्ठीं नश्चाप्यागमलिङ्गं पश्यामः॥इदं तर्ह्यविभक्तसामानाधिकरण्येन कवि
भक्तिं च॥द्वयोश्चेदं भवति॥कयोर्विशेषणविशेष्ययोः संज्ञासंज्ञिनोर्वेति न चैतत्स्यात्॥विशेषणविशेष्यइति॥तन्नन॥द्वयोर्हि ~~विशेष्य-सं-~~ प्रतीतपदार्थयोर्विशेषणविशेष्यभा
वो भवति॥नचादैचः प्रतीतपदार्थकास्स्याः तासंज्ञिनावेव॥तत्र लोकात्संदेहः॥कः संज्ञी का संज्ञेति॥स चापि कः संदेहः॥यत्रोभे समानाक्षरे॥यत्र त्वन्यतरं लघु या
लघुसा संज्ञा॥यद्गुरु स संज्ञी॥कुत एतत्॥लघ्वर्थं हि संज्ञाकरणं॥तत्राप्ययमसंदेहः॥लघुत्वादेव यत्न वा पितृ समइति॥किं तर्हि अनाकृतिनाम चिह्नं॥अनाकृतिः संज्ञा आकृति

मतः संज्ञासंज्ञिनौ लोके मिहापि। तिमतोऽसां सपिंडस्य देवदत्त इति संज्ञा क्रियते। अथ कस्मादत्र भिन्नसंज्ञा भवन्ति। इह हि शब्दस्यावर्तिनो नादैच्छब्दः। तद्यथा। इतरथा हि देवदत्तशब्दस्यावर्तिन
मांसपिंडः। अथवा पूर्वोच्चारितः संज्ञी परोच्चारिता संज्ञा। कुत एतत्। सतो हि कार्यिणः कार्येण भवितव्यं। इतरथा हि सर्वनाम्नः सपिंडस्य देवदत्त इति संज्ञा क्रियते। कथं वृद्धि
रादैजिति। न देकमाचार्यस्य मंगलार्थं मिष्यतां। मांगलिक आचार्यो महतः शास्त्रौघस्य मंगलार्थं वृद्धिशब्दमादितः प्रयुंक्ते। मंगलादीनि हि शास्त्राणि प्रथन्ते। वीरपुरुषकाणि
च भवंति। आयुष्मत्पुरुषकाणि च। अध्येतारश्च वृद्धियुक्ता यथा स्युरिति। सर्वत्र हि व्याकरणे पूर्वोच्चारितः संज्ञी परोच्चारिता संज्ञेति। अदेङ्गुण इति यथा। दोषवान् खल्वपि
संज्ञाधिकारः। अयमेव हि संज्ञाधिकारस्तत्तस्य परमाम्रेडितमिति। तत्र यदिदमनुवर्त्स्यति स्यात्। अथवा स्थाने ऽयं तत्र क्रियते। महीदलो काक्रियते। यदि दलो [illegible]
[illegible] नानुवर्त्स्यति। अनुवर्तते। [illegible] विप्रतिषिद्धमनुवर्तते। नचास्मार्यो [illegible] ते गौरिति। नियमस्य संकेति। भवति चास्य संप्रत्ययः। [illegible]
[illegible] पूर्वैर्मि संबंधः केः आचार्यैः। तत्रैतत्स्यात्। अस्त्येतद्धि संप्रत्युपदेशाविति स्यात्। स्वप्रति। अथ तत्र मतः। इहापि कृतो [illegible]
[illegible] भावान्दा [illegible] इतरेतराश्रयत्वादप्रसिद्धिः। सतः संज्ञिनः संज्ञाभावात् संज्ञया च संज्ञि [illegible] इतरेतराश्रयत्वादप्रसिद्धिः। [illegible] इतरेतराश्रयता। [illegible]
[illegible] भवितव्यं संज्ञया चादैचो भाव्यन्ते। इतरेतराश्रयाणि भवंति। इतरेतराश्रयाणि कार्याणि न प्रकल्पन्ते। इतरेतराश्रयाणि कार्याणि न प्रकल्पन्ते। तद्यथा। नौर्नावि बद्धा नेतरत्राण
[illegible] भवति। ननु च भो इतरेतराश्रयाण्यपि दृश्यन्ते कार्याणि। तद्यथा। नौः शकटं वहति। शकटं च नावं वहति। अन्यदपि किंचिद्भवति। [illegible]
[illegible] इति। शकटं वहति। अपि भवितव्यं हि सिद्धं [illegible] इतरेतराश्रयमेव। सिद्धं तु नित्यशब्दत्वात्। सिद्धमेतत्। कथं। नित्यशब्दत्वात्। नित्याः शब्दाः। नित्येषु शब्देषु सतां २१
मादैचां संज्ञा क्रियते। न संज्ञया आदैचो भाव्यन्ते। यदि तर्हि नित्याः शब्दाः किमर्थं शास्त्रमिति। चेन्निवर्तकत्वात्सिद्धं। निवर्तकं शास्त्रं। कथं। मृजिरस्मा अविशेषेणोपदिष्टः। तस्य स

र्थं वृद्धिरिति संज्ञा। तस्मात् न निवृत्तिः क्रियते। मृजेरजादौ संक्रमे विभाषा वृद्धिर्भवतीति प्रत्येकं गुणवृ
द्धिसंज्ञे भवत इति वक्तव्यं। किं प्रयोजनं। समुदाये मा भूतामिति। अन्यत्र सहवचनात्समुदाये संज्ञाप्रसंगः। अन्यत्र
सहवचनात्समुदाये वृद्धिगुणसंज्ञयोरप्रसंगः। यत्रेच्छति सहभूतानां कार्यं करोति तत्र सहग्रहणं। तद्यथा। सह सुपेति
वभेऽन्यत्र सह इति। प्रत्यवयवं वाक्यपरिसमाप्तिः। प्रत्यवयवं वाक्यपरिसमाप्तिर्दृश्यते। तद्यथा। देवदत्तयज्ञदत्तवि
ष्णुमित्रा भोज्यन्तामिति। न चोच्यते प्रत्येकमिति प्रत्येकं भुजिः परिसमाप्यते। ननु चायमप्यस्ति दृष्टान्तः समुदाये वा
क्यपरिसमाप्तिरिति। तद्यथा। गर्गाः शतं दण्ड्यन्तामिति। अर्थिनश्च राजानो हिरण्येन भवन्ति। न च प्रत्येकं दण्डयन्ति।
सत्येतस्मिन् दृष्टान्ते यदि सहग्रहणं क्रियते। इहापि प्रत्येकमिति वक्तव्यं। अथ तत्रान्तरेण सहग्रहणं भूतानां कार्यं भवति।
इहापि नार्थः प्रत्येकमिति वचनेन। अथ किमर्थमाकारस्तपरः क्रियते। आकारस्य तपरकरणं सवर्णार्थं। आकारस्य तपरकरणं
क्रियते। किं प्रयोजनं। न परस्तत्कालस्येति। तत्कालानां सवर्णानां ग्रहणं यथा स्यात्। के चोदात्तस्वरितानां। किं च कारणं न
स्यात्। भेदकत्वात्स्वरस्य। भेदका उदात्तादयः। कथं पुनर्ज्ञायते भेदका उदात्तादय इति। एवं हि दृश्यते। लोके उदात्ते कर्त्त
व्येऽनुदात्तं करोति खण्डिकोपाध्यायस्तस्मै चपेटिकां ददाति। अन्यत्त्वं करोषीति। अस्ति प्रयोजनमेतत्। किं तर्हि भेदकत्वाद्गु

२३४ नयस्तत्कालस्येतित्रिमात्रा नु नपरो ऽस्मात्कोत्संतपरः नेत्याह। नादावित्परस्तपरः कृदोरविशिष्टे स्यात्। यथा स्वः। भेद्याः पदः। अत्र न स्यादिति तकारः॥ ४२३

णस्येति वक्तव्यं। किं प्रयोजनं। आनुनासिक्यं नाम गुणः तद्भिन्नस्यापि यथा स्यात्। किं कारणं न स्यात्। भेदका हि गुणाः। कथं पुन
र्ज्ञायते भेदका गुणा इति। एवं हि लोके दृश्यते। एको ऽयमात्मा उदकं नाम तस्य गुणभेदादन्यत्वं भवति। अन्यदिदं शीतमन्यदिदमुष्णमि
ति। ननु च भोः अभेदका अपि गुणा दृश्यन्ते। तद्यथा। देवदत्तो मुण्ड्यपि जट्यपि शिख्यपि स्वामाख्यां न जहाति। तथा बालो युवा वृद्धः वत्सो द
म्यो बलीवर्द इति। उभयमिदं गुणेषूक्तं। भेदका अभेदका इति। किं पुनरत्र न्याय्यं। अभेदका गुणा इत्येव न्याय्यं। कुत एतत्। यदयं
मस्थिदधिसक्थ्यक्ष्णामनङुदात्तग्रहणं करोति तज्ज्ञापयत्याचार्यः अभेदका गुणा इति। यदि भेदकाः स्युरुदात्तमेवोच्चारयेत्।
यदि पुनर्भेदका गुणाः अनुदात्तादेरन्तोदात्ताच्च यदुच्यते तत्स्वरितादेस्स्वरितोत्तरस्य प्राप्नोति। नैष दोषः। आश्रीयमाणो भेदको भवति
तद्यथा। शुक्लमालभेत। कृष्णमालभेतेति। शुक्ले मा लब्धे कृष्णमालभते न तेन यथोक्तं भवति। असंदेहार्थस्तर्हि तकारः। ऐजित्युच्य
माने संदेहः स्यात्। किमिमावैचावेव आहोस्विदाकारोप्यत्र निर्दिश्यत इति। सर्वसंदेहेषु चेदमुपतिष्ठते। व्याख्यानतो विशेषप्रतिपत्तिर्न हि
संदेहादलक्षणमिति। अथवा आभ्यामिति व्याख्या स्यात्। अन्यथार्थमपि हि यमेवंजातीयकेषु संदेहेषु नाकिंचित्तन्नं करोति। तद्यथा। ओतोमश
सोरिति। इदं तर्हि प्रयोजनं। आन्तर्यतस्त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा मा भूवन्निति। खट्वा इन्द्रः खट्वेन्द्रः खट्वे
न्द्रादकः। खट्वोदकं। खट्वा ईषा। खट्वैषा। खट्वा ऊढा। खट्वौढा। खट्वा एलका। खट्वैलका। खट्वा ऐतिकायनः। खट्वैतिकायनः। खट्वौ
कायनः। खट्वा औपगवः। खट्वौपगवः। अथ क्रियमाणेपि तपरे कस्मादेव त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा न भ ॥२२॥
वन्ति। तकारो हि कारः किं तकारे प्रयोजनं। यथा संदेहार्थस्तर्हि तकारोपि। अथ मुखसुखार्थस्तकारः। तकारोपि। हल्ग्रहणादे तु अदेङ्गुणाः॥

अथ किं तकारे

नाग्र
गुणे
हि

॥ इको गुणवृद्धी॥ इग्ग्रहणं किमर्थं। इग्ग्रहणमात्संध्यक्षरव्यंजननिवृत्त्यर्थम्। इग्ग्रहणं क्रियते। आकार
निवृत्त्यर्थं संध्यक्षरनिवृत्त्यर्थं व्यंजननिवृत्त्यर्थं च। आकारनिवृत्त्यर्थं तावत्। याता वाता। आकारस्य गु
णः प्राप्नोति। इग्ग्रहणान्न भवति। संध्यक्षरनिवृत्त्यर्थं। ग्लायति म्लायति। संध्यक्षरस्य गुणः प्राप्नोति। इग्ग्र
हणान्न भवति। व्यंजननिवृत्त्यर्थम्। उंभिता उंभितुं उंभितव्यं। व्यंजनस्य गुणः प्राप्नोति। इग्ग्रहणान्न भवति।
आकारनिवृत्त्यर्थं तावन्नार्थः। आचार्यप्रवृत्तिर्ज्ञापयति। नाकारस्य गुणो भवतीति। यदयमातोनुपसर्गे
क इति ककारमनुबंधं करोति। कथं कृत्वा ज्ञापकं। कित्करण एतत्प्रयोजनं किति इत्याकारलोपो यथा स्या
त्। यदि चाकारस्य गुणः स्यात् कित्करणमनर्थकं स्यात्। गुणे कृते द्वयोः पररूपत्वे सिद्धं रूपं स्यात्। गोदः कंबलद इति।
पश्यत्याचार्यो नाकारस्य गुणो भवतीति। ततः ककारमनुबंधं करोति। संध्यक्षरनिवृत्त्यर्थेन चापि नार्थः। उपदेशसा
मर्थ्यात्संध्यक्षरस्य गुणो न भविष्यति। व्यंजननिवृत्त्यर्थेन चापि नार्थः। आचार्यप्रवृत्तिर्ज्ञापयति व्यंजनस्य गुणो न
भवतीति। यदयं जनेर्डं शास्ति। कथं कृत्वा ज्ञापकं। डित्करण एतत्प्रयोजनं डितीति टिलोपो यथा स्यात्। यदि च व्यंजन
स्य गुणः स्यात् डित्करणमनर्थकं स्यात्। गुणे कृते त्रयाणामकाराणां पररूपे कृते सिद्धं रूपं स्यात्। उपसरजो मं

डुरऊ इति। पश्यत्वाचार्यो व्यंजनस्य गुणो न भवतीति ततो जनेर्ड शास्ति। नैतानि संति ज्ञापकानि। यत्तावदुच्य
ते किं करणं ज्ञापकं नाकारस्य गुणो भवतीति। उत्तरार्थमेतत् स्यात्। तुंदशोकयोः परिमृजापनुदोरिति। यत्तर्हि गापोष्ट
गिति अनन्यार्थं ककारमनुबंधं करोति। यद्युच्यते उपदेशसामर्थ्यात् सिध्यक्षरस्य गुणो न भवतीति। यदि यद्यत्संध्य
क्षरस्य प्राप्नोतीति तत् उपदेशसामर्थ्याद्बाध्येत। आयादयो न प्राप्नुवंति। नैष दोषः। यं विधिं प्रत्युपदेशोऽनर्थकः स विधि
र्बाध्यते यस्य तु विधेर्निमित्तमेव नासौ बाध्यते। गुणं च प्रत्युपदेशोऽनर्थकः स। आयादीन् प्रति पुनर्निमित्तमेव। यदप्यु
च्यते ऊर्णोतेर्ड इति वचनं ज्ञापकं न व्यंजनस्य गुणो भवतीति। सिद्धे विधिरारभ्यमाणो ज्ञापकार्थो भवति। न च ऊर्णोतेर्गुणो ल
प्स्यति। कुतो ह्येतत्। ऊर्णोतेर्गुण उच्यमानोऽकारो भविष्यति। न पुनरेकारो वा स्यादोकारो वेति। आंतर्यतोऽर्ध
मात्रिकस्य मात्रिकोऽकारो भविष्यति। एवमप्यनुनासिकः प्राप्नोति। पररूपेण शुद्धो भविष्यति। एवं तर्हि गमे
रप्ययं डो वक्तव्यः। गमेश्च गुण उच्यमानोऽन्तर्यतस्तर्हि ओकारः प्राप्नोति। तस्मादिग्ग्रहणं कर्त्तव्यं। यदीग्ग्रहणं क्रियते द्योः
पंथाः शम इति। एतेपि इकः प्राप्नुवंति। संज्ञाविधाने नियमः। संज्ञया ये विधीयंते तेषु नियमः क्रियते। किं वक्तव्यमे २३
तत्। न हि। कथमनुच्यमानं गंस्यते। गुणवृद्धिग्रहणसामर्थ्यात्। कथं पुनरन्यतरेण गुणवृद्धिग्रहणेन इको गुण
वृद्धी स्यातां। प्रकृतं गुणवृद्धिग्रहणमनुवर्त्तते। क्व प्रकृतं। वृद्धिरादैजदेङ्गुण इति। यदि तदनुवर्त्तते अदेङ्गुणो वृद्धि

श्चेत्यदेङां वृद्धिसंज्ञा प्राप्नोति। संबंधमनुवर्त्तिष्यते। वृद्धिरादैजदेङ्गुणो वृद्धिरादैच् ततः इको गुणवृद्धी इति गु
णवृद्धिग्रहणमनुवर्त्तिते। आदेज्ग्रहणं निवृत्तं। अथवा मंडूकप्लुतयोऽधिकाराः। यथा मंडूका उत्प्लुत्योत्प्लुत्य
गच्छंति अंतरालं त्यजंति तद्वदधिकाराः। अथवा एकयोगः करिष्यते। वृद्धिरादैजदेङ्गुण इति। ततो इको
गुणवृद्धी इति। न चैकयोगेनुवृत्तिर्भवति। अथवान्यवचनाच्चकाराकरणात् प्रकृतापवादो विज्ञायते
यथोत्सर्गेण प्रकृतस्यापवादो बाधको भवति। अन्यस्याः संज्ञाया वचनाच्चकरणस्य चानुकरणार्थस्याकर
णात् प्रकृताया वृद्धिसंज्ञाया गुणसंज्ञा बाधिका भविष्यति। यथोत्सर्गेण प्रसक्तस्यापवादो बाधको भवति।
अथवा वक्ष्यत्येतत्। अनुवर्त्तिते च नाम विधयो न चानुवर्त्तिदेव भवंति। किं तर्हि यत्नाद्भवंतीति। अथवाउ
भयं निवृत्तं तदपेक्षिष्यामहे। किं पुनरयमलोंत्यशेषः आहोस्विदलोंत्यापवादः। कथं चायं तच्छेषः कथं वा
तदपवादः। यद्येकं वाक्यं तत्रेदं च। अलोंत्यस्य विधयो भवंति। इको गुणवृद्धी अलोंत्यस्येति ततोयं तच्छे
षः। अथ नाना वाक्यमलोंत्यस्य विधयो भवंति। इको गुणवृद्धी अंत्यस्य चानंत्यस्य चेति ततोयं तदपवा
दः। कश्चात्र विशेषः। वृद्धिगुणावलोंत्यस्येति चेन्मिदि पुगंतलघूपधर्च्छिदृशिक्षिप्रक्षुद्रेष्विग्ग्रहणं। वृ
द्धिगुणावलोंत्यस्येति चेन्मिदि पुगंतलघूपधर्च्छिदृशि क्षिप्रक्षुद्रेष्विग्ग्रहणं कर्त्तव्यम्॥ मिदेर्गुणः। इ

कइति वक्तव्यं। अनंत्यत्वान्न प्राप्नोति। तृदशोः ङिप्यजे ईडिरिक्इति वक्तव्यमनंत्यत्वान्न प्राप्नोति। पुगंतल
घूपधस्य गुण इक इति वक्तव्यमनंत्यत्वान्न प्राप्नोति। ऋछेर्लिटि गुण इक इति वक्तव्यमनंत्यत्वान्न प्राप्नोति।
हिप्रच्छुस्योर्गुण इक इति वक्तव्यं। अनंत्यत्वान्न प्राप्नोति। सर्वादेशप्रसंगश्चानिगंतस्य। सर्वादेशश्च गुणोऽ
निगंतस्य प्राप्नोति। याता। वाता। किं कारणं। अलोंत्यस्येति षष्ठी चैव ह्युतमिकमुपसंक्रांता। अंगस्येति च स्था
नषष्ठी। तद्यदीदानीमनिगंतस्य गुणः सर्वादेशः प्राप्नोति। नैष दोषः। यथैव तर्हि अलोंत्यस्य षष्ठ्युत्तमिकमुपसंक्रां
ता एवमंगस्येत्यपि स्थानषष्ठी। तद्यदीदानीमनिगंतमंगं तत्र षष्ठ्येव नास्ति कुतो गुणः कुतः सर्वादेशः। एवं त
र्हि नायं दोषसमुच्चयः। किं तर्हि पूर्वापेक्षोयं दोषः। ह्रस्वार्थं चायं चः पठितः। मिदिपुगंतलघूपधर्च्छिदृशिक्षि
प्रच्छुरे श्विग्रहणं सर्वादेशप्रसंगो ह्यनिगंतस्येति। मिदेर्गुण इति वचनादंत्यस्य न अंत्यस्येति वचनादिकोन
उच्यते च गुणः। सर्वादेशः प्राप्नोति। एवं सर्वत्र। अस्तु तर्हि तदपवादः। इक्षात्रस्येति चेज्जुसि सार्वधातुका
र्द्धधातुक क्रस्वाद्योर्गुणेष्वनंतप्रतिषेधः। इक्षात्रस्येति चेज्जुसि सार्वधातुकार्द्धधातुक क्रस्वाद्योर्गुणेष्वनंत्य २४
स्यप्रतिषेधो वक्तव्यः। जुसि गुणः स यथेह भवति। अजुहवुरबिभयुरिति। एवमनेनिजुः पर्यवेविषुरत्रापि
प्राप्नोति। सार्वधातुकार्द्धधातुकयोर्गुणः स यथेह भवति कर्ता हर्ता नयति तरति भवति। एवमीहिताई

अथाप्येवं नियमः स्यात्। पुगंतलघूपधस्य सार्वधातुकार्द्धधातुकयोरेवेति। ८

हितुमीहितव्यमित्यत्रापि प्राप्नोति। ह्रस्वस्य गुणः स यथेह भवति। हे अग्ने हे वायो इति एवं हे अग्निचित्
हे सोमसुत् इत्यत्रापि प्राप्नोति। जसि गुणः स यथेह भवति। अग्नयो वायव इति। एवमग्निचितः। सोमसुत इत्य
त्रापि प्राप्नोति। ऋतो ङिसर्वनामस्थानयोर्गुणः। स यथेह भवति। कर्त्तरि कर्त्तारौ कर्त्तार इति। एवं सुकृति सुकृतौ
सुकृत इत्यत्रापि प्राप्नोति। घेर्ङिति गुणः स यथेह भवति। अग्नये वायव इति। एवमग्निचिते सोमसुते इत्यत्रापि
प्राप्नोति। ओर्गुणः स यथेह भवति। बाभ्रव्यो मांडव्य इति। एवं सुश्रुत् सौश्रुत इत्यत्रापि प्राप्नोति। नैष दोषः। पुगंत
लघूपधग्रहणमनंत्यनियमार्थं। पुगंतलघूपधग्रहणमनंत्यनियमार्थं भविष्यति। पुगंतलघूपधस्यैवानंत्य
स्य नान्यस्यानंत्यस्येति। प्रकृतस्यैष नियमः स्यात्। किं च प्रकृतं सार्वधातुकार्द्धधातुकयोरिति। तेन भवेदिह
नियमान्न स्यात् ईहिता ईहितुं ईहितव्यमिति। क्रस्वाद्योर्गुणस्त्वनियतः। सोनंत्यस्यापि प्राप्नोति। ए
वमपि सार्वधातुकार्द्धधातुकयोर्गुणोनियतः सोनंत्यस्यापि प्राप्नोति। ईहिता ईहितुमीहितव्यमि
ति। अथाप्युभयतो नियमः स्यात् पुगंतलघूपधस्यैव सार्वधातुकार्द्धधातुकयोः सार्वधातुकार्द्धधातुक
योरेव पुगंतलघूपधस्येति। एवमप्ययं जुसि गुणोनियतः सोनंत्यस्यापि प्राप्नोति। अनेनिजुः पर्यवेविषु

२ अथापि तदपवादः। उत्सर्गापवादयोरयुक्तो विप्रतिषेधः।

२५

रिति। एवं तर्हि नायं तच्छेषो नापि तदपवादः। अन्यदेवेदं परिभाषांतरमसंबद्धमनया परिभाषया। परिभा
षांतरमिति च मत्वा क्रोडीयाः पठंति। नियमादिको गुणवृद्धी भवतो विप्रतिषेधेनेति। यदि चायं तच्छेषः स्यात्
तेनैव तस्यायुक्तो विप्रतिषेधः। तत्र नियमस्यावकाशः। राज्ञः क च राजकीयं। इको गुणवृद्धी इत्यस्यावकाशः।
चयनं चायकः। लवनं लावकः। इहोभयं प्राप्नोति मेद्यति मार्ष्टीति। इको गुणवृद्धी इत्येतद्भवति विप्रतिषेधेन। नैष
युक्तो विप्रतिषेधः। विप्रतिषेधे हि परमित्युच्यते पूर्वश्चायं योगः परो नियमः। इष्टवाची परशब्दः। विप्रतिषे
धे परं यदिष्टं तद्भवतीति। एवमप्ययुक्तो विप्रतिषेधः। द्विकार्ययुक्तो विप्रतिषेधः। न चात्र एको द्विकार्ययुक्तः।
नावश्यं द्विकार्ययोग एव विप्रतिषेधः। किं तर्हि असंभवोऽपि सः। अस्ति चात्रासंभवः। इह तावद्वृक्षेभ्यः प्लक्षे
भ्य इति। एकं स्थानी द्वावादेशौ न चास्ति संभवः। यदेकस्य स्थानिनो द्वावादेशौ स्यातां। इहेदानीं मेद्यति मेद्यतः मे य
द्यंतीति द्वौ स्थानिनौ एक आदेशः न चास्ति संभवो द्वयोः स्थानिनोरेक आदेशः स्यादित्येषोऽसंभवः। सत्य
तस्मिन्नसंभवे युक्तो विप्रतिषेधः। एवमप्ययुक्तः द्वयोर्हि सावकाशयोः समवस्थितयोर्विप्रतिषेधो भवति।
अनवकाशश्चायं योगः। ननु चेदानीमेवास्यावकाशः प्रक्लृप्तः। चयनं चायकः लवनं लावक इति। अत्रा
नियमः प्राप्नोति। यावतानाप्राप्ते नियमेऽयं योग आरभ्यते अथ तदपवादोऽयं योगो भवति। उत्सर्गापि

२५

वादयोश्चायुक्तो विप्रतिषेधः॥ अथापि कथंचिदिको गुणवृद्धी इत्यस्यावकाशः स्यात् एवमपि यथेह विप्रतिषेधादिको गु
णो भवति। मेद्यति मेद्यतः मेद्यंतीति। एवमिहापि स्यात्। अनेनिजुः पर्यवेविषुरिति। एवं तर्हि गुणो भवतीति यत्र ब्रूयात् इक
इत्येतत्तत्रोपस्थितं द्रष्टव्यं। किं कृतं भवति। द्वितीया षष्ठी प्रादुर्भाव्यते। तत्र कामचारः। गृह्यमाणेन चेकं विशेषयितुं इका च गृ
ह्यमाणं यावता कामचारः। इह तावन्मिदिलघूपधर्च्छिक्षिप्रक्षुद्रगृह्यमाणेनेकं विशेषयिष्यामः। एतेषां य इगिति। इहेदानीं
जुसिसार्वधातुकार्धधातुकऋत्स्वाद्यो गुणे इकाग्गृह्यमाणं विशेषयिष्यामः। एतेषां गुणो भवति। इकः इगंतानामिति। अ
थवा सर्वत्रैवात्र स्थानी निर्दिश्यते। इह तावन्मिदेरिति अविभक्तिको निर्देशः। मित् एः मिदेः। मिदेरिति। अथवा षष्ठीस
मासो भविष्यति। मिद इः मिदिः मिदेरिति। पुगंतलघूपधस्येति नैवं विज्ञायते। पुगंतस्यांगस्य लघूपधस्येति कथं तर्हि पुकि
अंतः पुगंतः। लघ्वी उपधा लघूपधा पुगंतश्च लघूपधा च पुगंतलघूपधं पुगंतलघूपधस्येति। अवश्यं चैतदेवं विज्ञेयं। अंगविशे
षणे सति हि प्रसज्येत भिनत्ति छिनत्ति। ऋच्छेरपि प्रश्लिष्टनिर्देशोऽयं ऋच्छति ऋ ऋतामिति। दृशेरपि योगविभागः करिष्यते। उरङि गुणः
उरङि गुणो भवति। ततो दृशेः। दृशेश्चाङि गुणो भवति। उरित्येव। क्षिप्रक्षुद्रयोरपि यणादिपरं इतीयता सिद्धं। सोऽयमेवं सिद्धे सति य
त्पूर्वग्रहणं करोति तस्यैतत्प्रयोजनं। इको यथा स्यात् अनिको मा भूदिति। अथ वृद्धिग्रहणं किमर्थम्॥ किं विशेषेण वृद्धिग्रहणं चोद्यते
न गुणग्रहणमपि। यदि किंचिद्गुणग्रहणस्य प्रयोजनमस्ति। वृद्धिग्रहणस्यापि तद्भवितुमर्हति। को वा विशेषः। गुणविधौ न स्थानीके यत्र

नि निर्दिश्यते तत्रावश्यं स्थानीनिर्देशार्थं गुणग्रहणं कर्तव्यं। वृद्धिविधौ पुनः सर्वत्र स्थानी निर्दिश्यते। अचो ञ्णिति। अत उपधायाः।
तद्धितेष्वचामादेरिति। अत उत्तरं पठति वृद्धिग्रहणं तु उत्तरार्थं। वृद्धिग्रहणं क्रियते उत्तरार्थं क्ङिति चेति प्रतिषेधं वक्ष्यति स वृद्धेरपि य
था स्यात्। कश्चेदानीं क्ङित्सु प्रत्ययेषु वृद्धिप्रसंगो यावता ञ्णितीत्युच्यते। मृज्यर्थं। मृजेर्वृद्धिरविशेषेणोच्यते सा क्ङिति मा
भूत्। मृष्टः मृष्टवानिति। इहार्थं चापि मृज्यर्थं वृद्धिग्रहणं कर्तव्यं। मृजेर्वृद्धिरविशेषेणोच्यते सा इको यथा स्यात्। अनिको मा भू
दिति। मृज्यर्थमिति चेद्योगविभागात्सिद्धं। मृज्यर्थमिति चेद्योगविभागः करिष्यते। मृजेर्वृद्धिः। ततो ञ्णितीति। ञिति णिति च वृद्धिर्भ
वति। अच इत्येव। यावद्वृद्धिरुच्यते अमार्ट्। अटोपि वृद्धिः प्राप्नोति। अटि चोक्तं। अनन्त्यविकारेन्त्यसदेशस्य कार्यं भवतीति। वृद्धिप्रतिषे
धानुपपत्तिस्त्विक्प्रकरणात्। वृद्धेस्तु प्रतिषेधो नोपपद्यते। किं कारणं। इक्प्रकरणात्। इग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः। न चेदं
सति मृजेरिग्लक्षणा वृद्धिर्भवति। तस्मान्मृजेरिग्लक्षणा वृद्धिरेषितव्या। एवं तर्हि इहान्ये वैयाकरणा मृजेरजादौ संक्रमे विभाषा वृद्धिमार
भन्ते। परिमृजन्ति परिमार्जन्ति। परिममृजतुः परिममार्जतुरित्याद्यर्थं तदिहापि साध्यं। तस्मिन्साध्ये योगविभागः करिष्यते। मृजेर्वृद्धिरचो भ
वति। ततो ञ्णिति। अजादौ क्ङिति मृजेर्वृद्धिर्भवति। परिमार्जन्ति। परिममार्जतुः। किमर्थमिदं नियमार्थम्। अजादावेव क्ङिति नान्यत्र। क्वा
न्यत्र मा भूत्। मृष्टः मृष्टवानिति। ततो वा। वा च क्ङिति मृजेर्वृद्धिर्भवति। परिमृजन्ति परिमार्जन्ति। परिममृजतुः परिममार्जतुरिति। इहार्थमेव
तर्हि सिज्यर्थं वृद्धिग्रहणं कर्तव्यं सिचि वृद्धिरविशेषेणोच्यते स इको यथा स्यादनिको मा भूदिति। कस्य पुनरनिकः प्राप्नोति। अकारस्य। अचिकी
र्षीत्। अजिहीर्षीत्। नैतदस्ति। लोपोऽत्र बाधको भविष्यति। आकारस्य तर्हि प्राप्नोति। अयासीत्। अवासीत्। नास्त्यत्र विशेषः। सत्यां वृद्धौ वास
त्यां वा। संध्यक्षरस्य तर्हि प्राप्नोति। न चैवं संध्यक्षरमन्त्यमस्ति। ननु चेदमस्ति ढलोपे कृते। उदवोढाम्। उदवोढम्। उदवोढेति। नैतदस्ति।
असिद्धो ढलोपः।। ।। तस्यासिद्धत्वान्नैतदं संभवति।। व्यंजनस्य तर्हि प्राप्नोति।। अभैत्सीत्।। अच्छैत्सीत्।। हलन्तलक्षणा वृद्धि

२६ २६

द्धिर्बाधिका भविष्यति। यत्र तर्हि सा प्राप्नोति निषिध्यते। अकोषीत्। अमोषीत्। सिचि वृद्धिरयं प्रतिषेधः। कथं लक्षणा हि नाम
ध्रुवनिवर्तमाना निमित्तेन विना वतिष्ठते। अथवा सिचि वृद्धिः परस्मैपदेष्विति प्राप्नोति। तस्या हलन्तलक्षणा वृद्धिर्नेटीति कान्तस्यापि
नेटीति प्रतिषेधः। अस्ति पुनः क्वचिदन्यत्रापि अपवादे प्रतिषिद्धे उत्सर्गोऽपि न भवति। अस्ति। त्वाहा सुजाते अश्वसूनृते अ
ध्वर्यो अद्रिभिः सुतं शुक्रं ते अन्यादिति। पूर्वरूपत्वे प्रतिषिद्धे अयायादेशोऽपि न भवति। उत्तरार्थमेव तर्हि सिज्यर्थं वृद्धिग्रहणं क
द्वि २५ र्तव्यं। सिचि वृद्धिरविशेषेणोच्यते सा क्ङिति मा भूत्। न्यनुवीत्। न्यधुवीत्। नैतदस्ति प्रयोजनं। अंतरंगत्वादत्रोवङादेशे कृते अनन्त्यत्वा
द्वृद्धिर्न भविष्यति। यदि तर्हि सिच्यंतरंगं भवति। अकार्षीत्। अहार्षीत्। गुणे कृते रपरत्वे कृते अनन्त्यत्वाद्वृद्धिर्न प्राप्नोति। मा भू
देवं हलन्तस्येत्येवं भविष्यति। इह तर्हि न्यस्तारीत्। न्यजारीत्। गुणे कृते रपरत्वे चानन्त्यत्वाद्वृद्धिर्न प्राप्नोति। हलन्तलक्षणा =यवादेशो
याश्च नेटीति प्रतिषेधः। मा भूदेवं ञ्नान्तस्येत्येवं भविष्यति। इह तर्हि अलावीत्। अपावीत्। गुणे कृते चानन्त्यत्वाद्वृद्धिर्न प्रा
प्नोति। हलन्तलक्षणायाश्च नेटीति प्रतिषेधः। मा भूदेवं ञ्नान्तस्येत्येवं भविष्यति। ञ्नान्तस्येत्युच्यते। न चेदं ञ्नान्तं। ञ्नान्तस्येत्य
त्र वकारो विनिर्दिश्यते। किं वकारो न श्रूयते। लुप्तनिर्दिष्टो वकारः। यद्येवं मा भवानवीत्। अत्रापि प्राप्नोति। अविमव्यो
र्नेति वक्ष्यामि। तद्वक्तव्यं। निर्दिश्यमानौ निमातव्यौ। यद्यप्येतदुच्यते। अथवैतर्हि णिश्व्योः प्रतिषेधो न वक्तव्यो भवति। गुरो

नवकवं १

हन्ते आयादेशो चर्यैतानावेत्येवं प्रतिषेधो भविष्यति। एवं तर्हि। आचार्यप्रवृत्तिर्ज्ञापयति। नासिद्ध्यंतरंगं भवतीति। यदयम
न्तो हलादेर्लघोरित्यकारग्रहणं करोति। कथं कृत्वा ज्ञापकं। अकारग्रहणस्यैतत्प्रयोजनं। इह मा भूत्। अकोषीत्। अ
मोषीत्। यदि सिद्ध्यंतरंगं स्यात्। अकारग्रहणमनर्थकं स्यात्। गुणे कृते अलघूपधत्वाद्वृद्धिर्न भविष्यति। पश्यति त्वाचार्यो
न सिद्ध्यंतरंगं भवतीति। ततोऽकारग्रहणं करोति। नैतदस्ति ज्ञापकं। अस्ति ह्यन्यदेतस्य वचने प्रयोजनं। किं। यत्र गुणः प्र
तिषिध्यते। तदर्थमेतत्स्यात्। न्यकुटीत्। न्यपुटदिति। यत्तर्हि णिश्र्योः प्रतिषेधं शास्ति तेनेहान्तरंगमस्तीति दर्शयति। यत्र
करोत्यकारग्रहणं। लघोरिति कृते। तस्मादिग्लक्षणा वृद्धिः। तस्मादिग्लक्षणा वृद्धिरास्थेया। षष्ठ्याः स्थानेयोगत्वाद्वृद्धि हि दिश
षष्ठ्याः स्थानेयोगत्वात्सर्वेषामिकां निवृत्तिः प्राप्नोति। अत्रापि प्राप्नोति। दधि मधु। पुनर्वचनमिदानीमनर्थकं स्यात्। अ गुणिरचे
न्यतरार्थं पुनर्वचनं। अन्यतरार्थमेतत्स्यात्। सार्वधातुकार्धधातुकयोरिति। प्रसारणे च। प्रसारणे च सर्वेषां निवृत्तिः
प्राप्नोति। अस्यापि प्राप्नोति। याता। वाता। पुनर्वचनमिदानीं किमर्थं स्यात्। विषयार्थं पुनर्वचनं। विषयार्थमेतत्स्यात्। वधि
स्वपियङादीनां किति। व्येवेति। उरण् रपरे सर्वेष्वकाराणां निवृत्तिः प्राप्नोति। अस्यापि प्राप्नोति कर्तृ हर्तृ। सिद्धं तु षष्ठ्य २९
धिकारे वचनात्। सिद्धमेतत्। कथं। षष्ठ्यधिकारे इमे योगाः कर्तव्याः। एकस्तावत्क्रियते तत्रैवेमावपि योगौ षष्ठ्यधिका

च

रे तु वर्तिष्यते। अथवा षष्ठ्यधिकारे इमौ योगावपेक्षिष्यामहे। अथवा इदं तावदयं प्रष्टव्यः। सार्वधातुकार्धधातुकयोर्गुणो भवती
तीह कस्मान्न भवति। याता। वाता। इदं तत्रापेक्षिष्यामहे। इको गुणवृद्धी इति षष्ठी चेत्तत्रापेक्ष्यते। एवमपि तदपेक्षिष्यामहे
सार्वधातुकार्धधातुकयोरिति॥ ॥श्रीः॥ ॥इति श्रीभगवत्पतञ्जलिविरचिते श्रीमहाभाष्ये प्रथमस्याध्यायस्य प्रथमे पादे
तृतीयमाह्निकम्॥ ॥श्रीनमः श्रीविठ्ठलनाथाय॥ ॥न धातुलोप आर्धधातुके॥ ॥धातुग्रहणं किमर्थं। इह मा भूत्। लूञ्
भवितुं ५ लविता। पूञ् पविता। आर्धधातुकग्रहणं किमर्थं। त्रिधा बद्धो वृषभो रोरवीति। किं पुनरिदमार्धधातुकग्रहणं लोपविशेषणं।
पवितुं ५ आर्धधातुकनिमित्ते लोपे सति इको गुणवृद्धी प्राप्नुतस्ते न भवत इति। आहोस्विद्गुणवृद्धिविशेषणमार्धधातुकग्रहणं। धातु
लोपे सति आर्धधातुकनिमित्ते इको गुणवृद्धी प्राप्नुतस्ते न भवत इति। किं चातः। यदि लोपविशेषणं। उपेद्धः। प्रेद्धः। अत्रापि
६१३ प्राप्नोति। अस्तु लोपविशेषणं। कथमुपेद्धः प्रेद्ध इति। बहिरंगो गुणः। अंतरंगः प्रतिषेधः। असिद्धं बहिरंगमंतरंगे। यद्येवं नार्थो
धातुग्रहणेन। कस्मान्न भवति। लूञ् लविता लवितुं। आर्धधातुकनिमित्ते लोपे प्रतिषेधः। न चैष आर्धधातुकनिमि
त्तो लोपः। अथवा पुनरस्तु गुणवृद्धिविशेषणं। ननु चोक्तं क्नोपयतीत्यत्रापि प्राप्नोतीति नैष दोषः। निपातनात्सिद्धं।
चेलिक्नोपेरिति। परिगणनं वा कर्तव्यं। यङ्यक्क्यच्लोपे प्रतिषेधः। यङ्यक्क्यच्लोपे प्रतिषेधो वक्तव्यः। यङ्

अथ गुणवृद्धिविशेषणे क्नोपयतीत्यत्रापि प्राप्नोति। यचेक्सितपास्तु ५

बेभिदिता । मरीमृज्यकः । यङ्कः । कुसुम्भिता । मगधकः । क्ष्म । समिध्यिता । दृषद्कः । वलोपे दीरदानुः । किं प्रयोजनं । नुम्लो-
पे स्त्रियनुबंधलोपे प्रतिषेधार्थं । नुम्लोपे स्त्रियनुबंधलोपे च प्रतिषेधो मा भूदिति । नुम्लोपः । अभाजि रागः । उपबर्हणा ।
स्त्रिवेः । आस्रेमाणं । अनुबंधलोपे । लूञ् खलपित्तुं । यदि परिगणनं क्रियते । स्यदः । प्रश्रथः । हिमश्रथ इत्यत्रापि प्राप्नोति
वेदन्वेतन्निपातनात्स्यदादिष्विति । तत्र हि परिगणनं कर्त्तव्यं न कर्त्तव्यं । नुम्लोपे कस्मान्न भवति । द्रुकुन्द्रकरणा नुम्लो-
पे ह्रस्वविधिः । इग्लक्षणायोर्गुणवृद्ध्योः प्रतिषेधः । नैवेग्लक्षणा वृद्धिः । यदीग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः स्यदः प्रश्रथ
हिमश्रथ इत्यत्र न प्राप्नोति । इह च प्राप्नोति । अवोदः । एधः । उद्भ इति । निपातनात्स्यदादिषु । निपातनात्स्यदादिषु प्रतिषे-
धो भविष्यति न च न भविष्यति । यदीग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः । स्त्रियनुबंधलोपे कथं । प्रश्नसाश्रमत्वादन्यत्र सिद्धं । आ-
र्द्धधातुकनिमित्ते लोपे प्रतिषेधः । न चैष आर्द्धधातुकनिमित्तो लोपः । यद्यार्द्धधातुकनिमित्ते लोपे प्रतिषेधः । दीरदानुः । अत्र
न प्राप्नोति । किञ्च्वः संप्रसारणं । नैतज्ज्ञीविरूपं । रक्षितव्यं । ज्वः संप्रसारणं । यावता चेदानीं रक्तिर्जीविरपि सिद्धं भवति
कथमुपबर्हणा इति । प्रकृत्यन्तरं । कथं ज्ञायते । बर्हिः प्रकृत्यन्तरमिति । अचीति हि लोप उच्यते अनजादावपि दृश्यते । निबर्ह-
णा । अनिटीति चोच्यते । इडादावपि दृश्यते । निबर्हिता । निबर्हितुमिति । अजादावपि दृश्यते । बर्हयति । इह कस्मान्न भवति । परि
न । त

२८